श्री हर्षपुष्पामृत जैन ग्रन्थमाला-ग्रन्थाङ्क-१०८

श्री चन्द्रप्रभस्वामिने नमः

श्री मणिबुद्ध्याणंदहर्षकर्पूरामृतसूरिभ्यो नमः

पूज्याचार्यश्री धनप्रभगुरुचरण-राजीवाचार्यदेव श्री सर्वाणन्दसूरीश्वर विरचितं

# श्रीजगडूचरितं महाकाव्यम्

सम्पादक —

तपोमूर्तिपूज्याचार्यदेव श्रीविजयकर्पूरसूरीश्वर पट्टधर-हालारदेशोद्धारक

पूज्याचार्यदेव श्रीमद् विजयामृतसूरीश्वर पट्टधरः

## पू. आ. श्री विजयजिनेन्द्रसूरिवरः

---

पूज्यपादविद्वानमुनिराज श्रीमदक्षयविजयोपदेशेन श्री पीपलगांव (बसवंत) महाराष्ट्रस्थ श्री श्वेताम्बर मूर्तिपूजकतपगच्छसंघकृतसहायेन तथा पू. मुनिराज श्री गुणसुन्दर-विजयोपदेशेन पेटलाद (गुजरात) श्री श्वेताम्बरमूर्तिपूजकतपगच्छसंघकृतसहायेन च

---

प्रकाशयित्री—श्री हर्षपुष्पामृत जैन ग्रन्थमाला, लाखाबावल-शांतिपुरी (सौराष्ट्र)

प्रकाशिका—

**श्री हर्षपुष्पामृत जैन ग्रन्थमाला**

लाखाबावल-शांतिपुरी ( सौराष्ट्र )

| वीर सं० | वि० सं० | ई० सन् | प्रथमावृत्ति प्रतियां |
| --- | --- | --- | --- |
| २५०८ | २०३८ | १९८२ | ५०० |


# आभार

आ प्रकाशन माटे परम पूज्य विद्वानवक्ता मुनिराज श्री **अक्षयविजयजी** महाराजना सदुपदेशथी **श्री पीपलगांव बसवंत ( जि. नासिक )** ना **श्री श्वेताम्बर मूर्तिपूजक तपगच्छ संघे** तथा परम पूज्य मुनिराजश्री **गुणसुन्दरविजयजी** महाराजना सदुपदेशथी **पेटलाद (जि. खेड़ा) श्री श्वेताम्बर मूर्तिपूजक तपगच्छ संघे** सहाय करतां तेमना तरफथी आ ग्रन्थ प्रगट करवामां आव्यो छे. प्रेरक पूज्य मुनिराजो ने वदन करी तेमनो आभार मानीए तथा दाता संघो नो पण आभार मानीए छीए. तेओ पुनः पुनः आवा प्राचीन साहित्यना उद्धारमां लाभ ले एज शुभेच्छा ।

शाक मारकेट सामे
**जामनगर** (सौराष्ट्र)

**महेता मगनलाल चत्रभुज**
व्यव०-श्री हर्षपुष्पामृत जैन ग्रन्थमाला

मुद्रक—**गौतम आर्ट प्रिन्टर्स**
नेहरु गेट बाहर, **ब्यावर** (राजस्थान)

॥ २ ॥

# 卐 किञ्चिद्वक्तव्यम् 卐

सात सर्गात्मक आ श्री जगडू चरित्र महाकाव्य चौदमा सैकामां रचायुं छे, अने श्री आत्मानन्द जैन सभा–भावनगर तरफथी प्रगट थयुं हतुं ।

जगडू शाहनुं नाम धर्मना इतिहासमां तेजस्वी छे. तेमना सुकृतनी सुवास भारत भरमां फेलाएली छे. तेमना जीवन अंगेना ग्रन्थमां आ मुख्य ग्रन्थ छे अपूर्ण माहिती होय तो पण जे प्राप्त छे ते महत्वनी छे ।

आ ग्रन्थ पू. आचार्यदेव श्री धनप्रभगुरुशिष्य पू. आ. श्री सर्वाणन्दसूरिजी महाराजे रच्यो छे. जे महाकाव्य रूपे पण छे. ते महाकाव्यना गुण साथे छन्दोनी वैविध्यता पण धरावे छे एथी काव्य छन्दना अभ्यासीओ माटे पण उपयोगी छे, जेथी पुस्तक रूपे प्रगट थएल छे. वाचना माटे पण उपयोगी होवाथी आ प्रताकारे भारे हाथ बनावटना कागलमां प्रसिद्ध करायुं छे ।

कर्ताए सर्गने अन्त आचार्य श्री धनप्रभगुरु चरण राजीवएम शब्द कर्यो छे तथा आदिमां परमदेव गुरु पूर्णिमापक्षना परमदेव गुरुने नमस्कार कर्यो छे. जे आचार्य जगडू शाहना वडिलोना गुरु गणाव्या छे. राका पूर्णिमापक्षना घणा आचार्यो जगडू-शाहना संघमां हता तेम जणाव्युं छे. जेथी तेओ पण ए पक्षना संभवे छे. परमदेवसूरीश्वरना शिष्य श्रीषेणसूरिवर गणाव्या छे. कर्ता तेमना परिवारमां होय तेम संभवे छे. वि. सं. १३१२ नो दुष्काल जगडूशाहे पार कराव्यो तेम लख्युं छे. कर्ता पण चौदमी सदीमां थया छे. जेथी श्री परमदेवसूरिवरना परिवारमां संभवे छे ।

बीजा एक सर्वानन्दसूरिजी थया छे तेमणे मंगलकलश रास रच्यो छे. परन्तु तेओ १५मां सैकाना अन्तमां के सोलमा सैकानो आदिमां थया छे. तेथी ते आ काव्यना लेखकथी भिन्न छे।

भाद्रपद कृष्ण १४ गुरुवार
जैन उपाश्रय
२, ओसवाल कोलोनी
जामनगर (सौराष्ट्र)

लि०–
हालारदेशोद्धारक पूज्याचार्य श्री
विजयामृतसूरीश्वर पट्टधर
**जिनेन्द्रसूरि**

卐

## ॥ शुद्धिपत्रकम् ॥

| पृष्ठं | पंक्ति | अशुद्धं | शुद्धम् |
|---|---|---|---|
| ६ | २ | ब्द्यो | द्व्यो |
| २८ | ७ | मनोहर | र्मनोहर |
| ५१ | १३ | सर्वभृत्समुद्धारी | सर्वभूभृत्समुद्धारी |
| ५२ | ४ | तात्रैक | त्रातैक |
| ५८ | ४ | छलद्भुवि | छलाद्भुवि |
| ६१ | ५ | समभूतत्प्रभूतर | समभूत्प्रभूततर |

॥ १ ॥

॥ अर्हम् ॥

तपोमूर्ति पूज्याचार्यदेव श्रीविजय कर्पूरसूरीश्वर पट्टप्रभावक हालारदेशोद्धारक पूज्याचार्यदेव श्रीविजयामृत सूरिभ्यो नमः ।

## आचार्यश्री धनप्रभगुरुचरण-राजीवाचार्यप्रवरः श्रीसर्वाणन्दसूरिविरचितं

# ॥ श्रीजगडूचरितं महाकाव्यम् ॥

### ॥ वियद्दुप्रभृतिपूर्वपुरुषव्यावर्णनो नाम प्रथमः सर्गः ।

( वसन्ततिलकावृत्तम् )

यन्मूर्ध्नि पन्नगफणामणिदीपजाग्र–ज्ज्योतिस्तमोविजयि विघ्नपतङ्गभेदि ।
आविष्करोति कृतिनामपवर्गमार्गं, स श्रेयसे भवतु पार्श्वजिनाधिनाथः ॥ १ ॥
अज्ञानपङ्कनिकरव्यतिषङ्गनाशं, शश्वत्प्रसादसलिलेन समुज्ज्वलेन ।
बालस्य मे विरचयातिशयाभिरामे, मातः सरस्वति जगज्जनवन्द्यपादे ॥ २ ॥
अर्हन्मतार्णवविलासविधाननिष्टं, राकाभिधेयशुचिपक्षविराजमानम् ।
दुष्कर्मतापदलनं किल सूरिचन्द्रं, वन्दामहे परमदेवमुदारभक्त्या ॥ ३ ॥

॥ १ ॥

तीव्रापकारकरणैकहृदोऽपि सर्वे, ते दुर्ज्जना जगति जाग्रतु नित्यमेव ।
येषां नितान्तभयतः क्वचनापि काव्य-मार्गात्स्खलन्ति कवयो न लसद्विवेकाः ॥ ४ ॥
सन्तः पवित्रचरिता दुरिताभिमुक्ता, राजन्ति ते विधुविभाजयिसद्गुणौघाः ।
स्वार्थं विमुच्य सुतरां हि परार्थसार्थ-संसाधनाय दधते निजमानसं ये ॥ ५ ॥
स्वर्गापवर्गपदवीसमवाप्तिमेष, कल्पद्रुमो न ददते ध्रुवमर्थितोऽपि ।
धर्मः स्वभावसरलस्तु विवेकभाजां, तां लीलयैव ददतेऽपि गतस्पृहाणाम् ॥ ६ ॥
विश्वत्रयीहितकृता प्रकटीकृतो यः, श्रीनाभिभूपतनयेन जिनेश्वरेण ।
दानादिभेदकलिताय नमोऽस्तु तस्मै, धर्माय भूतिधृतिकीर्तिमतिप्रदाय ॥ ७ ॥
लक्ष्मीस्तरङ्गतरला पवनप्रकम्प-श्रीवृक्षपत्रनिभमायुरिहाङ्गभाजाम् ।
तारुण्यमेव नवशारदसान्ध्यराग-प्रायं स्थिरा सुकृतजा किल कीर्तिरेषा ॥ ८ ॥
गङ्गातरङ्गविमलेन यशोभरेण, दानोद्भवेन किल कल्पशतस्थिरेण ।
एकस्त्रिलोकमखिलं धवलीचकार, धिक्कारकृत् कलिरिपोर्जगडूर्विवेकी ॥ ९ ॥
चेतः प्रसीदतितरां भवतः पवित्रौ, कर्णौ जवादपि च गच्छति सर्वदुःखम् ।
हर्षः परिस्फुरति साधुजनस्य सम्य-गाकर्णितेऽत्र जगडूचरिते प्रशस्ते ॥१०॥
सारस्वतस्मरणजाग्रदुदग्रबुद्धि-प्राग्भारभासुरकवीश्वरवर्ण्यमानम् ।

॥ ३ ॥

गीर्वाणवारणरदद्युतिसोदरं न, कः संस्तवीति जगद्गुणचक्रवालम् ॥११॥
वाचस्पतेरपि धियामवकाशता न, स्तोतुं गुणाञ्जगति यस्य नितान्तपूतान् ।
कर्तुं हि तस्य जगद्गुसुधियश्चरित्र-मुत्कण्ठितोऽहमधुना स्मितभूर्न्न कस्य ॥१२॥
विद्यामहोदधिशशाङ्ककलासमाने, मातः सरस्वति मुखे वस मे निकामम् ।
नो चेत् प्रसिद्धजगद्गुचरितप्रथायां, मन्दादरस्य तु सतो मम ते त्रपैव ॥१३॥
संस्मृत्य वाचममलां स्वगुरोः क्रमाब्ज-द्वन्द्वं च पुण्ययशसः प्रथयामि हन्त ।
तस्योत्तमं चरितमद्भुतभावभासि, तच्छ्रूयतां सुकृतिभिः कलितप्रमोदैः ॥१४॥
कल्याणवानखिलभूमिभृतां सुमान्यो, मित्रद्विजाधिपतिधिष्ण्यकृतोरुदीप्तिः ।
श्रीमालवंश इह मेरुरिवोन्नतोऽस्ति, संसेवितः प्रतिदिनं विबुधैरनेकैः ॥१५॥
मर्यादया परियुतो जगतीधराणा-माधारतामुपगतः सुतरां गभीरः ।
पुंरत्नजातिकलितः सुकृतस्रवन्ती-संयोगभाग्विजयते जलराशिवद्यः ॥१६॥
तस्मिन्बभूव सकलव्यवहारिमुख्यो, भास्वद्विवेकविनयादिगुणैकधामा ।
वोयद्दुरुत्तमजिनेश्वरधर्ममर्म-विज्ञाननिर्मलमतिः कमलाभिरामः ॥१७॥
अश्रान्तभूवलयभूरितरोरुभारो-द्धारोद्भवश्रमजदुःखमपाकरोति । ३ ॥
पातालभर्तुरुरगीभिरतिप्रमोदा-द्यद्दानकीर्तिरमला परिगीयमाना ॥१८॥

यत्कीर्त्तिपूरविमले भुवनत्रयेऽस्मिन्, मन्ये हिमाचलसुता मुदमाससाद ।
दिग्वाससं श्रितकपालममुं पतिं मे, नातः परं यदवलोकयितुं परोऽलम् ॥१९॥
श्रीसङ्घभक्तिजिनमन्दिरकूपवापी–सत्रप्रपाप्रमुखपुण्यचयं विधाय ।
प्रौढप्रतापमवनौ परिवर्त्तमानं, कामं कलेरपि च यो दलयाम्बभूव ॥२०॥
सच्चक्रनन्दकतया च महःश्रिया च, शाश्वत्परग्रहसुनिग्रहकारणेन ।
मित्रोपमामयमवाप दुरापकीर्ति–श्चित्रं पुनर्यदवनेर्हरतिस्म तापम् ॥२१॥
तस्याङ्गजोऽजनि जनप्रमदैकवार्त्ता–धाम श्रियां च **वरणाग** इति प्रसिद्धः ।
यत्कीर्तिनव्यशुचिहारयुता निरीच्य, काष्ठाः प्रिया हि चकिता हृदि वासवाद्याः ॥२२॥
भोगावती परिजिता त्वमरावती वा–नध्यालका किल यया शतशो दधत्या ।
भोगीश्वरान् विबुधपान् धनदान् स कन्थां, तामध्युवास नगरीमथ मन्मथाभः ॥२३॥
गौरीपतेरपि शिरः सततं श्रितो यः, शीतद्युतिर्न समवाप कलां द्वितीयाम् ।
विश्वत्रयीधवलनोद्यतयास्य कीर्त्या, पुष्टिं गतस्तु स बिभर्त्ति कलाकलापम् ॥२४॥
शत्रुञ्जयाभिधगिरावथ रैवताद्रौ, सङ्घाधिपत्यमधिगत्य चकार यात्राम् ।
यः कल्पवृक्ष इव दीनजनस्य दैन्य–मुद्दामदानकलया दलयाम्बभूव ॥२५॥
तन्नन्दनः सकलसज्जनवर्ण्यमानः, श्रीमज्जिनाधिपतिसेवनकक्षबद्धः ।

**वासाभिधः** समजनिष्ट विशिष्टबुद्धिः, सत्पात्रपाणिविमलीकृतभूरिवित्तः ॥२६॥
नीचाननाश्रयभवात्मतमोऽपहन्तुं, वाग्देवता भगवतीव जगाम सापि ।
सत्कीर्त्तिपूरपरिपूरितदिङ्मुखस्य, यस्याननं रुचिरसत्यगिरा पवित्रम् ॥२७॥
आकर्ण्य पन्नगवधूजनगीयमान—मुद्दामदानविधिजातयशःसमूहम् ।
यस्यान्वहं बलिरसौ च रसातलस्थः, सेहे दृढं हि निजबन्धनतापदुःखम् ॥ २८ ॥
**श्रीवीसलस्तु**[1] नयवानथ **वीरदेवो**[2], **नेमिश्च**[3] निर्मलयशःकलितश्च **चाण्डूः**[4] ।
**श्रीवत्स**[5] इत्यनघवैभवभूषितस्य, पञ्चाङ्गजाः शुशुभिरे किल यस्य धन्याः ॥२६॥
कल्पद्रुमैरिव सुमेरुगिरिः प्रशस्तैः, साधुर्व्रतैरिव मुखैरिव वामदेवः ।
*अङ्गैर्महीदयितमन्त्र इव व्यराज-द्यः पञ्चभिः कृतिभिरङ्गभवैरमीभिः ॥३०॥
वर्ण्यः कथं न स कृती किल वीसलाख्यो, यस्य प्रशस्यगुणवर्णनकारणेन ।
धर्त्ता भुवोऽपि भुजगाधिपतिः स्वकीयाः, कामं शुचीरयममंस्त समस्तजिह्वाः ॥३१॥
कलियुगरिपुभीतो न क्वचित्स्थातुमीशो, विविधगुणनिवासं यं समाश्रित्य मन्ये ।
अभजत पुनरेष प्रौढिमानं तु धर्म्मो, न भवति गुरुसङ्गाद्दीप्तियोगो हि कस्य ॥३२॥

[ मालिनीवृत्तम् ]

---

* सहायाः साधनोपायाः, विभागो देशकालयोः । विनिपात-प्रतीकारः, सिद्धिः पञ्चाङ्गमिष्यते ॥१॥

॥ ५ ॥

जगत्त्रयीपावनयद्गुणावली–गानैकतानः सुतरां विरञ्चनः ।
न तं पुनश्चिन्तयितेति तर्क्कये, सन्ध्याब्दथोपासनबन्धुरं विधिम् ॥३३॥
[ वंशस्थवृत्तम् ]

[1]लक्ष [2]सुलक्षण [3]सोलक [4]सोही–नाममनोहरपुत्रचतुष्कः ।
वीसल एष सुधर्मविशेषं, कं न चकार निरस्तकुबोधः ॥३४॥
[ दोधकवृत्तम् ]

अथ प्रपूर्यायुरसौ स्वकीयं, सद्धर्धकर्मप्रथनैकचितः ।
अनन्यमाहात्म्यभराभिरामो, जज्ञे सुरो भासुरकायकान्तिः ॥३५॥
[ उपजातिवृत्तम् ]

( शार्दूलविक्रीडितवृत्तम् )

विघ्न दूरत एव यान्ति निखिलाः सम्पत्तयः सन्ततं,
द्योतन्ते परितः स्फुरन्ति विविधाः कल्याणमालास्तथा ।
सत्कीर्तिः प्रसरीसरीति भवति श्रेयस्करी सन्तति–
स्तेषां ये हृदि चिन्तयन्ति कृतिनस्तं भूमिपीठे सुरम् ॥ ३६ ॥

लक्षः शङ्खवलक्षकीर्तिनिकरव्याप्तक्षमामण्डलः,
शश्वल्लक्षणमुख्यशास्त्रविदुरो लक्षप्रदातार्थिनाम् ।

दूरीभूतकुलक्षणः किल जिनाधीशक्रमाब्जद्वयी-
सेवाजाग्रदुदग्रपुण्यनिवहः प्रीतिं न कस्यातनोत् ॥ ३७ ॥

सुलक्षणस्यापि हहा निरर्गला, गुणाः सतां जह्रुरहो मनोधनम् ।
वृथा प्रतीतिर्जगतीति कारण-स्वभावभाक् कार्यमवेक्ष्यतेऽखिलम् ॥३८॥
[ वंशस्थवृत्तम् ]

[ शार्दूलविक्रीडितवृत्तम् ]

नो शम्भुर्वृषभं हिमाचलसुता कण्ठीरवं नो निजं,
न ब्रह्मा किल राजहंसमिथुनं नैरावणं वासवः ।
दूरे मुञ्चति जातुचित्पुनरपि क्लेशात्तदीप्त्या भृशम्,
श्रीसोलस्य यशः-श्रिया धवलितेऽप्यस्मिंस्त्रिलोकेऽखिले ॥३९॥

चारुरूपकलिता दयितासीत्, श्रीः पवित्रवरिष्ठा किल तस्य ।
प्रेमवैभववतीव मुरारे, रुक्मिणी गिरिसुतेव हरस्य ॥ ४० ॥
[ स्वागतावृत्तम् ]

सोहो नामा वर्ण्यते कैर्न धीरः, सोऽयं गङ्गातोयशुभ्रैर्गुणौघैः ।
चित्रं चित्रं सर्वदा सज्जनानां, रागाधिक्यं हृत्सु येन व्यधायि ॥४१॥
[ शालिनीवृत्तम् ]

॥ ७ ॥

[ शार्दूलविक्रीडितवृत्तम् ]

किं चिन्तामणिना किमु द्युतरुणा किं कामगव्या तया,
किं वा पूर्णघटेन किं जलधिना किं रोहणक्ष्माभृता ।
किं वा मेचकचित्रकेण यदसौ सौलस्तु सोमाननो,
दृष्टोऽस्माभिरुदारभाग्यकलया दारिद्र्यसर्वङ्कषः ॥ ४२ ॥

सकलयाचकचातकपोषक--न्निजसुहृत्तरुवर्धनबन्धुरः ।
खलजवासकदैन्यविधायकः, स शुशुभे भुवि दानघनाघनः ॥४३॥

[ द्रुतविलम्बितवृत्तम् ]

सप्ततत्त्वविदुरः शुचिसप्त--क्षेत्रभावनिहितोत्तमवित्तः ।
सप्तदुर्गतिभयेन विमुक्तः, सप्तसप्तिरभवत्स महोभिः ॥ ४४ ॥

[ स्वागतावृत्तम् ]

कर्पूरमन्दारगिरीशगौरै--र्गुणैरनेकैः कलितो नयाद्यैः ।
महेभ्यमुख्यः किल सोलनामा, प्रमोदयामास सतां मनांसि ॥४५॥

[ उपजातिवृत्तम् ]

।। इत्याचार्यश्रीधनप्रभगुरुचरणराजीवचञ्चरीकशिष्यश्रीसर्वाणन्दसूरिविरचिते श्रीजगडूचरिते महाकाव्ये वीयद्दुप्रभृतिपूर्वपुरुष-व्यावर्णनो नाम प्रथमः सर्गः ।। १ ।।

## ॥ भद्रेश्वरपुरख्यावर्णनो नाम द्वितीयः सर्गः ॥

॥ ६ ॥ [ उपजातिवृत्तम् ]

महापुरन्ध्रीकरदर्पणाभं, महेभ्यलोकैः परिभासमानम् ।
अस्तीह भद्रेश्वरनामधेयं, पुरं वरं कच्छकृतैकशोभम् ॥ १ ॥
यत्र श्रियं त्रातुमिवाहिराजः, पातालमध्यात्परिखामिषेण ।
आविर्बभूवोत्तमदुर्गदम्भा-न्निरन्तरं कुण्डलितोरुकायः ॥ २ ॥
कृतैकराज्यश्रवणेन शल्यं, कलेरभूद्यत्र हृदि प्रकामम् ।
नक्तं दिवं दैवतमन्दिरेषु, घण्टारवादर्त्तिरमुष्य चासीत् ॥ ३ ॥
निसर्गदौर्गत्यनिपीडिताय, जनाय दातुं करुणां दधानः ।
तटे ततानेव तरङ्गहस्तै रत्नानि रत्नाकर एव यत्र ॥ ४ ॥
सुवर्णराशिं किल रत्नराशि-मट्टस्थितं वीक्ष्य वणिग्जनस्य ।
यत्रागतां पान्थजनः सुमेरो-रब्धेरमंस्तापि च सारलक्ष्मीम् ॥ ५ ॥
महेश्वरस्यैकजयाय काम-श्चकार रूपाणि सहस्रशोऽपि । ॥ ६ ॥
यत्राद्भुताकारविशेषभाजां, दम्भेन रङ्गत्तरुणव्रजानाम् ॥ ६ ॥

तथा विधाता विदधेऽखिलानां, रूपश्रियं यत्र नितम्बिनीनाम् ।
यथा सुराणां स्ववधूजनेऽपि, तदीक्षणात्कार्यमवाप रागः ॥ ७ ॥
निशासु सौधोपरिसंस्थितानां, मृगीदृशां यत्र च चारुगानम् ।
आकर्णयन्तं स्वमृगं सुधांशु-र्याताय कृच्छ्रात्त्वरयाम्बभूव ॥ ८ ॥
यत्रेन्दुकान्तालय एव यूनां, शीतांशुकान्त्या गलितामृताम्बुः ।
नक्तं निदाघेऽपि रतश्रमोत्थ-तापव्यपोहं रचयाञ्चकार ॥ ९ ॥
भोगावती दुष्टभुजङ्गनिन्द्या-मरावती दुश्च्यवनान्विता च ।
विश्वैकसारा च कुबेरनाथा, नान्योपमां यत्र विभावयामि ॥१०॥
यत्राङ्गनानां वदनेन्दुबिम्ब-लावण्यपीयूषमतीव पीत्वा ।
महेश्वरेणापि च दग्धमूर्तिः, पुनर्नवत्वं श्रयतिस्म कामः ॥११॥
पारापतेभ्यः शुचिसौधदेश-मधिष्ठितेभ्यः किल यत्र रात्रौ ।
चारूणि कामं रतकूजितानि, स्वयं नवोढाः कलयाम्बभूवुः ॥१२॥
माणिक्यहर्म्यावलिचङ्गशृङ्गपरिस्फुरत्काञ्चनकुम्भदम्भात् ।
निशास्वनेकार्कविलोकनेन, प्रकाममप्रीयत चक्रवाकः ॥१३॥
लक्ष्मीगिरौ यत्र च निर्विरोधं, क्रीडापरे वीक्ष्य मिथः सदैव ।

॥११॥

प्रीतिः परा . काप्युदभूद् हृदन्त-रम्भोनिधेश्चाम्बुरुहासनस्य ॥१४॥
क्रीडाशुकान्यत्र महेभ्यसद्म-कपोतपालीं भजतोऽतिनीलान् ।
नीलोपलज्योतिरदृश्यकाया-नोतुस्तदीयध्वनिना ह्यबोधि ॥१५॥
यत्रोष्मनिःश्वासमनुश्चदीशा-न्तिकेऽपि काचिद् गृहरत्नभित्तौ ।
सङ्क्रान्तमूर्तिस्तु निजां सपत्नी-माशङ्कमाना सहसाभ्युपेताम् ॥१६॥

[ उपजातिवृत्तम् ]

नानारत्नमयालयद्युतिभरे जम्भारिचापभ्रमं,
बिभ्राणेऽगरुधूपधूमनिवहे व्योम्न्यभ्ररूपे सति ।
अश्रान्तं मधुरे मृदङ्गनिनदेऽप्युज्जृम्भमाणे पुन-
र्नृत्यं यत्र वितेनिरेऽपि शिखिनः क्रीडावनस्थायिनः ॥१७॥

[ सार्दूलविक्रीडितवृत्तम् ]

भर्तुः परीरम्भसुखामृतेन, हृत्सिश्च दुःसाध्यवियोगतापम् ।
विमुञ्च मानं च कृतार्थय त्व-मिदं दुरापं नवयौवनं च ॥१८॥
क्रीडाशुकी काचन धन्यगेहे, विचारयुक्ता सुतरां सखीव ।
अबूबुधद्यत्र किलेति दीर्घ-मानान्वितां काञ्चन चारुनेत्राम् ॥१९॥ ॥११॥

युग्मम् ॥

सौधान्तरागत्य मरुद्गवाक्ष-मार्गेण पुष्पावलिगन्धरम्यः ।
पस्पर्श वक्षोजयुगं वधूनां, यत्राप्यहो पुण्यमये दिवापि ॥२०॥
मृगीदृशां हृत्सरसि स्मरोऽयं, रतिं श्रयन्यत्र चकार केलिम् ।
तत्प्रौढवक्षोरुहकैतवात्त—त्कुम्भद्वयेनातिमनोहरश्रीः ॥२१॥
प्राणप्रियेणापि हृते करेण, रागेण यत्र स्वनितम्बवस्त्रे ।
सत्पद्मरागालयभावृताङ्गी, सरोजनेत्रा ह्रियमाप नैव ॥२२॥
वापीषु कूपेषु सरस्सु यत्र, पीयूषपूरं निदधे पयोधिः ।
सूर्योऽपि सम्भाव्य सुरव्रजेभ्यः, स्वमन्थनं भीत इव प्रकामम् ॥२३॥

[ वसन्ततिलका ]

[ रथोद्धतावृत्तम् ]

देवभक्तिगुरुभक्तिबन्धुरा, बन्धुवर्गपरितोषकारकाः ।
दम्भलोभमदमत्सरोज्झिता, यत्र पुण्यमतयो जना बभुः ॥२४॥
घुघुरा जयति यत्र देवता, घोरविघ्ननिकरैकवारिणी ।
सर्वदातिशयराजिधारिणी, विश्ववाञ्छितविभूतिकारिणी ॥२५॥
उन्नतित्वकलितः किल बिभ्रत्, स्थैर्यमद्रिरिव यत्र जनौघः ।

राजतेस्म च तदद्भुतमेव, यन्नितान्तमयमुज्झितकूटः ॥२६॥

[ स्वागतावृत्तम् ]

सुपात्रदत्तोज्ज्वलवित्तराशि–र्विमुक्तदोषः कृतधर्मपोषः ।

जनः समग्रोऽपि च यत्र रेजे, सौजन्यधन्यः कलितोरुकीर्तिः ॥२७॥

[ उपजातिवृत्तम् ]

कन्थां विमुच्य नगरीमधिकर्द्धिमाप्तुं, भद्रेश्वरे निवसति स्म पुरे स तत्र ।

**श्रीसोल** एष सुकृती स्वकुलेन युक्तः, साधोर्मतिः स्फुरति भूरितरोदयाय ॥२८॥

[ वसन्ततिलकावृत्तम् ]

॥ इत्याचार्यश्रीधनप्रभगुरुचरणराजीवचञ्चरीकशिष्यश्रीसर्वाणन्दसूरिविरचिते श्रीजगडूचरिते महाकाव्ये भद्रेश्वरपुरव्यावर्णनो नाम द्वितीयः सर्गः ॥२॥

卐

## ॥ रत्नाकरवरदानव्यावर्णनो नाम तृतीयः सर्गः ॥

[ अनुष्टुब्वृत्तम् ]

स्वकुलं भूषयामास, विमलैः शीतलैर्गुणैः ।

तमोपहैरयं व्योमकरैरिव सुधाकरः ॥ १ ॥

॥१३॥

तत्प्रिया श्रीरसूताथ, जगति प्रथितौजसः ।
**जग**[1]**डूराज**[2]**पद्मा**[3]**ख्यां**–स्तनयान्विनयान्वितान् ॥ २ ॥
त्रिभिर्बभासे भास्वद्भि–स्तनयैस्तत्कुलं शुचि ।
शिखिभिर्विप्रवेशमेव, गीतं ग्रामैरिवोत्तमैः ॥ ३ ॥
**जगडूः** कलयामास, भाग्यसौभाग्यबन्धुरः ।
जगज्जनमनस्तोष पोषकं गुणसञ्चयम् ॥ ४ ॥
स्वर्गाङ्गनापरीरम्भा–रम्भतोषिणि वप्तरि ।
जगडूरकरोत्प्रौढकुलभारोद्धृतौ मनः ॥ ५ ॥
भ्रातृभ्यां भूषितस्ताभ्यां प्रीतिदाभ्यां धरातले ।
पुनर्वसुभ्यां युक्तस्य, स श्रियं श्रितवान्विधोः ॥ ६ ॥
रम्भातिलोत्तमामेनो–र्वशीरूपविजित्वरीम् ।
**यशोमतीं** प्रियां प्राप, **जगडूः** शीलशालिनीम् ॥ ७ ॥
**राजल्लदेव्या** प्रियया, बिभ्रत्या प्रेमसम्पदम् ।
गुणान् कृतार्थयामास, **राजाख्यः** स्वस्थधीनिधिः ॥ ८ ॥
बभूव **पद्मा पद्मस्य,** दयिता हितकारिणी ।

शचीव मरुतां पत्युः कौमुदीवामृतद्युतेः ॥ ९ ॥
अतिदानव्यसनिनः, कृतिनः पुण्यशालिनः ।
न चिन्ता जगडूकस्य, धने तुच्छेऽप्यजायत ॥ १० ॥
अथान्येद्युः परिसरे, पुरस्यास्य स भाग्यभूः ।
पशुपालकमद्राक्षी-च्चारयन्तमजा निजाः ॥ ११ ॥
स्वयूथमध्यगामेका-मजामपि मनोहराम् ।
ग्रीवाबद्धमणिं दृष्ट्वा, स हृदीति व्यचिन्तयत् ॥ १२ ॥
सर्वश्रीसाधकः कामं, सद्भाग्यावाप्यदर्शनः ।
मणिर्यद्येष मे गेहे, तदा पूर्णा मनोरथाः ॥ १३ ॥
चिन्तयित्वेति जगडूः, पशुपालस्य किञ्चन ।
धनं दत्त्वा गृहीत्वाजां, तामगान्निजमन्दिरम् ॥ १४ ॥
अजाकण्ठात्तमाकृष्य, मणिं लक्ष्मीविधायिनम् ।
स्वगृहे पूजयामास प्रच्छन्नं च विचक्षणः ॥ १५ ॥
मणेर्महिम्ना तस्याथ, जगडूसदनान्तरे ।
प्रावर्द्धताखिला लक्ष्मी-र्भावनेव सदाशये ॥ १६ ॥

॥१५॥

चिन्तामणिरिवात्यर्थ-मर्थिनामभिलाषताम् ।
जगडूः पूरयामास, दानेनाथ गरीयसा ॥ १७ ॥
क्षीरार्णवतरङ्गाभै-र्जगडूकीर्तिसञ्चयैः ।
सद्दानकर्मजनितै-स्त्रिलोकी धवलीकृता ॥ १८ ॥
स्वप्रियायां यशोमत्यां, पुत्रीं **प्रीतिमतीमथ** ।
धृताविव मुदं श्रीमा-ञ्जगडूरुदपादयत् ॥ १९ ॥
वर्द्धमाना कुलाम्भोज-राजहंसी क्रमेण सा ।
मनो जहार नो कस्य, गत्या च कलया गिरा ॥ २० ॥
स तां कन्यामथान्येद्यु-**र्यशोदेवाय** दत्तवान् ।
तत्पाणिग्रहणादूर्ध्व-मयमाप मृतिं क्षणात् ॥ २१ ॥
अशुभं कुर्वतः स्थाने, शुभस्य प्रतिकूलतः ।
दैवस्यास्य न केनापि, महिमात्र तिरस्कृतः ॥ २२ ॥
ततः स्वज्ञातिवृद्धाना-मनुमत्यैष धीमताम् ।
वराय दातुमन्यस्मै, तनयामुपचक्रमे ॥ २३ ॥
वृद्धे कुलाङ्गने दक्षे, केचिद्वैधव्यदूषिते ।

श्रृङ्गारं स्फारमाश्रित्य, तमूचतुरिति स्फुटम् ॥ २४ ॥
पुत्र्या वैधव्ययुक्ताया, अपि चेद्धरमीक्षसे ।
तदावयोरपि श्रीम-न्विधेहि वरवीक्षणम् ॥ २५ ॥
तयोरिति वचः श्रुत्वा, प्रतिबोधोचितं शुचि ।
अवाप हृदये लज्जां, श्रीमालान्वयमण्डनः ॥ २६ ॥
मानयित्वा तयोर्वाचं, यशोमत्याः पतिस्ततः ।
स पुत्रीश्रेयसेऽकार्षी-त्कूपवाप्यादिकं विधिम् ॥ २७ ॥
पुत्रीवैधव्यदुःखं स, त्यक्त्वा हृदिभीगरधीः ।
नित्यं विरचयामास, धर्मकर्माण्यनेकशः ॥ २८ ॥
दारिद्र्य दलयन्नुच्चैः, सर्वेषामपि चार्थिनाम् ।
स कालं गमयामास, कियन्तं पुत्रवर्जितः ॥ २९ ॥
नानाविधानि पुण्यानि, कुर्वाणस्यापि नाभवत् ।
भ्रातृद्वयान्वितस्यापि, तस्य सत्पुत्रसन्ततिः ॥ ३० ॥
निशावसानसमये, श्रीसोलस्यादिमाङ्गजः ।
सन्तत्यानघया हीन-श्चिन्तयामासिवानिति ॥ ३१ ॥

॥१७॥

स्तम्भेनेव गृहं नागा-धीशेनेव महीतलम् ।
नङ्गरेणेव बोहित्थं, कुलं पुत्रेण धार्यते ॥ ३२ ॥
धूलिधूसरपुत्राङ्ग-परिष्वङ्गसुखामृतैः ।
धन्यानां हृदये तापः, सकलोऽपि विलीयते ॥ ३३ ॥
हहा ममापि मद्भ्रात्रो-रनयोर्नयशालिनोः ।
पवित्रा सन्ततिर्नास्ति, यया गोत्रं स्थिरीभवेत् ॥ ३४ ॥
इति चिन्ताभरव्यग्रं, प्रत्यग्रप्रेमशालिनी ।
प्रियं यशोमती प्रोचे, तमतीवविचक्षणा ॥ ३५ ॥
किमाधिरस्ति वा व्याधि-स्तव प्राणेश सम्प्रति ।
येनेदं त्वन्मुखं याति, दिवसेन्दुसमानताम् ॥ ३६ ॥
अस्ति मत्तव गोप्यं किं, रहस्यं जीवितेश्वर ।
येनेदमपि नो दुःखं, मदग्रे कथ्यते त्वया ॥ ३७ ॥
अथ प्राणप्रियामूचे, सोऽसामान्यगुणान्विताम् ।
भद्रे सत्पुत्रहीनत्वं, परं मे दुःखकारणम् ॥ ३८ ॥
ममापि किल मद्भ्रात्रो-रस्ति नो पुत्रसन्ततिः ।



॥१८॥

पतापतं कुलं वीच्य, तेन दूये निरन्तरम् ॥ ३९ ॥
श्रुत्वेति वचनं पत्युः, पुनः प्रोचे यशोमती ।
देवताराधनं कार्यं, त्वया सन्ततिसम्पदे ॥ ४० ॥
साधूदितं त्वया सुभ्रु !, जजल्पेत्यथ सोऽनघः ।
समुद्राराधनं सम्य-क्करिष्याम्याप्तुमीहितम् ॥ ४१ ॥
रत्नाकरं परित्यज्य, सर्वदैवतसंश्रितम् ।
आधारं भूभृतामुच्चैः, कः परं सेवते सुधीः ॥ ४२ ॥
पुत्रेणैव कुलं यस्मा-द्धर्मकार्यं धनेन च ।
तस्मात्तदुभयप्राप्त्यै, सेवे रत्नाकरं प्रिये ॥ ४३ ॥
यशोमत्यपि सावादी-द्दीनवदना पतिम् ।
सेत्स्यत्यदोऽखिलं कार्यं, यद्यब्ध्याराधनोद्यमः ॥ ४४ ॥
जगडूर्जगदानन्दी, कस्मिंश्चन शुभे दिने ।
ययौ वारिनिधेस्तीरे, पवित्रे जलसीकरैः ॥ ४५ ॥
ढौकयित्वाथ नैवेद्यं, विविधं भक्तिभासुरः ।
सोऽब्धिमाराधयामास, सप्ताहाशनवर्जितः ॥ ४६ ॥

॥१६॥

तद्भक्तिव्यक्तसम्प्रीत–मानसः [1]सुस्थितामरः ।
प्रादुर्बभूव तस्याग्रे, निशीथे भासुरद्युतिः ॥ ४७ ॥
प्रोत्फुल्लनयनद्वन्द्वः, स धीमाञ्जगडूर्ज्जवात् ।
प्रणम्य च महाभक्त्या, सुस्थितामरमस्तवीत् ॥ ४८ ॥
जयाखिलसुरावास, जय शतमहीधर ।
जय श्रीकनकप्रोच्चै–र्जय रत्नाकरप्रभो ॥ ४९ ॥
त्वत्त एव समासाद्य, जीवनं जलदावली ।
जगतीं जीवयत्येना–मखिलामपि लीलया ॥ ५० ॥
दर्शनेन तवानेन, त्वदेककृतचेतसः ।
अद्यैव पातकं सर्वं, प्रक्षीणं मम हेलया ॥ ५१ ॥
वंशवृद्धिकरं पुत्रं, धर्मवृद्धिकरीं श्रियम् ।
देहि मे चेत्प्रसन्नोऽसि, रत्नाकरसुरोत्तम ! ॥ ५२ ॥
स देवः प्रोचिवानेनं, कृतिन् भावी न ते सुतः ।
सर्वार्थसाधका लक्ष्मी–रेका भवतु निश्चला ॥ ५३ ॥

१. समुद्राधिष्ठापक देवः ।

पूरयिष्यसि यानि त्वं, यानपात्राण्यनेकशः ।
मद्वरेण न तेषूच्चैः, कश्चिद्विघ्नो भविष्यति ॥ ५४ ॥
असाविति वरप्रान्ते, तमाह सुरपुङ्गवम् ।
यथा मे पुत्रहीनत्वं मद्भ्रात्रोरपि किं तथा ॥ ५५ ॥
गिरेति प्रीणयामास, तमथो सुस्थितामरः ।
पुत्रौ पुत्रीं तव भ्राता, राजाख्यः समवाप्स्यति ॥ ५६ ॥
स्वकोशान्तरसाराणि, रत्नानि कीर्तिचत्सुवः ।
प्रदाय जगडूकाय, तिरोधत्त सुरोत्तमः ॥ ५७ ॥
निशाप्रस्थानपटह-ध्वनिडम्बरसोदरम् ।
अथ स्वरं प्रयत्नेन, चकार चरणायुधः[1] ॥ ५८ ॥

[ इत्यनुष्टुब्वृत्तम् ]

प्रस्वेदबिन्दुनिभनिर्गलदच्छतारा, विस्रस्तमेचकतमोवसना निकामम् ।
कोकाम्बुजन्मनिवहे विहितापराधा, शीघ्रं ययौ रविभियेव निशापिशाची ॥ ५९ ॥

[ वसन्ततिलकावृत्तम् ]



१. कुर्कुटः ।

अथ रथाङ्गकलारवसूचित-द्युमणिभर्तृसमागमशङ्किनी ।
²हरिहरित्प्रससाद तदाधिकं, गलिततामसशोकसमुच्चया ॥ ६० ॥

[ द्रुतविलम्बितवृत्तम् ]

जलनिधिवरदानप्राप्तहर्षप्रकर्षः, सुहृदयजनजाग्रत्तोषपोषः प्रभाते ।
कविवरपरिगीतस्फीतकीर्त्तिव्रजोऽसौ, निजसदनमवाप प्राज्यसौभाग्यलक्ष्मीः ॥ ६१ ॥

[ मालिनीवृत्तम् ]

इत्याचार्यश्रीधनप्रभगुरुचरणराजीवचञ्चरीकशिष्यश्रीसर्वाणन्दसूरि-विरचिते श्रीजगडूचरिते महाकाव्ये रत्नाकरवरदानव्यावर्णनो नाम तृतीयः सर्गः ॥ ३ ॥

卐

## ॥ भद्रसुरदर्शनो नाम चतुर्थः सर्गः ॥

पुरन्दरश्रीरधिकं दिदीपे, तस्मिन्पुरे सोलकुलप्रदीपः ।
निर्विघ्नमागच्छदुदारपोतो, रत्नाकरोत्कृष्टवरेण शश्वत् ॥ १ ॥

[ उपजातिवृत्तम् ]

२. पूर्वा दिक् ।

॥२३॥

अथोपकेशान्वयसम्भवेन, जयन्तसिंहेन गुणालयेन ।
संसेवितः श्रीजगडूरनेक-कार्यैकसंसाधनकोविदेन ॥ २ ॥
अम्भोधिमार्गेण जयन्तसिंह-स्तत्पोतमेकं बहुवस्तुपूर्णम् ।
आदाय लाभाय कृतप्रयत्नः, प्रपेदिवानार्द्रपुरं प्रशस्यम् ॥ ३ ॥

[ इत्युपजातिवृत्तम् ]

उत्तार्य पोतादखिलं स वस्तु, शस्तोपदाप्रीणितमन्दिरेशः ।
कस्यापि गेहं किल भाटकेन, तस्थौ गृहीत्वात्र ततो विशालम् ॥ ४ ॥

[ इन्द्रवज्रावृत्तम् ]

ग्रावाणमेकं जलधेः स तीरे, विलोकयामास पवित्रचेताः ।
भृत्यान्निजांस्तद्ग्रहणाय सम्य-ग्नियोजयामास निजेच्छया च ॥५॥

[ उपजातिवृत्तम् ]

अत्रान्तरे स्तम्भपुरीनिवासी, तुरुष्कपोतप्रवराधिकारी ।
प्रसङ्गतस्तत्र समाययौ च, तं प्रस्तरं प्रस्तुतमालुलोके ॥ ६ ॥
भृत्यान्नियुक्तानपि तद्ग्रहाय, जयन्तसिंहेन निवार्यमाणान् ।
निरीक्ष्य दर्पं सुतरां दधानो, वाचं जगादेति सकस्य भृत्यः ॥ ७ ॥

॥२३॥

ददाति दीनारसहस्रमेक-ममुष्य यो मन्दिरनायकस्य ।
स एव गृह्णाति दृढाभिमानी, ग्रावाणमेनं जलधेस्तटस्थम् ॥ ८ ॥
आकर्ण्य तस्येति वचो जयन्तः, पुनर्बभाषे भवतोक्तमाशु ।
द्रव्यं प्रदायार्द्रपुराधिपस्य, गृह्णामि पाषाणममुं हठेन ॥ ९ ॥
स म्लेच्छपोताधिपतिर्जगाद, द्रव्यं तदेतद्द्विगुणं प्रदाय ।
किलार्द्रभूपस्य कृतोरुसन्धो, ग्रावाणमादाय भजामि कीर्त्तिम् ॥१०॥
ददाति दीनारकलत्रमेकं, नरेश्वरस्यास्य तु योऽभिमानी ।
गृह्णातु पाषाणममुं स एव, जयन्तसिंहस्त्विति जल्पति स्म ॥११॥
स स्तम्भतीर्थीयतुरुष्कभृत्यो, भूयो जगादेति वचः सरोषः ।
द्रव्यं नृपस्य त्वदुदीरितं द्राक्, प्रदाय पाषाणममुं ग्रहीष्ये ॥१२॥
प्रदाय दीनारकलत्रयुग्म-ममुष्य भूपस्य कृतप्रतिज्ञः ।
गृह्णामि पाषाणममुं समन्ता-दित्याचचक्षे स जयन्तसिंहः ॥१३॥
स म्लेच्छभृत्यः पुनरप्युवाच, दीनारलक्षत्रितयं त्विदानीम् ।
ददाति यो मन्दिरभर्त्तुरेनं, स एव पाषाणमिहाददीत ॥१४॥
तद्वादमाकर्ण्य समागतस्य, नृपस्य तत्र त्वरितं तदानीम् ।

पणीकृतं द्रव्यचयं प्रदाय, पाषाणमङ्गीकृतवाञ्जयन्तः ॥१५॥
दुष्टग्रहेणाब्द इवाम्बुवर्षं, [1]दर्शेण शीतांशुरिव प्रकाशम् ।
शशाक दातुं द्रविणं तदानीं, न तेन वादेन स सत्प्रमाणम् ॥१६॥
पयोदवातेन यथात्मदर्शो[2], यथा हिमेनाम्बुरुहव्रजोऽपि ।
जयन्तसिंहेन तथा तुरुष्क-भृत्यः परिम्लानिमवाप बाढम् ॥१७॥
अहो महासाहसवाञ्जयन्तः, स्वनायकख्यातिकृते नृपस्य ।
अदत्त वित्तं दृषदर्थमेत-दित्यूचिरे तत्र जनाः समग्राः ॥१८॥

[ इत्युपजातिवृत्तम् ]

प्रत्यायनायात्मविभोर्गृहीत-पाषाणकः सोऽथ जयन्तसिंहः ।
पोतं तमादाय च वस्तुहीनं, भद्रेश्वरं मन्दिरमाससाद ॥१९॥

[ इन्द्रवज्रावृत्तम् ]

श्रीसोलसूनुं प्रणिपत्य सैष, पाषाणमानाय्य तमाशु धीरः ।
जजल्प चानल्पधियां निधान-मिति स्फुटं विस्मितसर्वसभ्य ॥२०॥
त्वत्कीर्त्तिरत्नाकृतये त्वदीयं, विनाशितं भूरिधनं मयेदम् ।

१ अमावास्यया । २ दर्प्पणः ।

॥२५॥

ग्राव्णोऽस्य हेतोः सहसार्द्रपुर्यां, यद्रोचते तत्कुरु मे त्विदानीम् ॥२१॥

[ उपजातिवृत्तम् ]

जल्पन्तमित्थं परिरभ्य दोर्भ्यां, विमुक्तहर्षाश्रुजलः प्रकामम् ।
जगज्जनस्तुत्ययशाः कृतज्ञः सभासमक्षं जगडूस्तमाह ॥२२॥

[ आख्यानकीवृत्तम् ]

ममाभिमानोत्तमजीवितव्यं, त्रातं त्वयैवाद्भुतबुद्धिधाम्ना ।
किलान्यदेशेपि करोमि तत्का-मुपक्रियां ते सुकृतान्वितस्य ॥२३॥
वाचं गदित्वेति स सप्रमोद-स्तस्मै दुकूलं करमुद्रिकां च ।
ददौ तदानीं क्व धियः स्खलन्ति, विवेकतो निर्मलमानसानाम् ॥२४॥

[ उपजातिवृत्तम् ]

तदीयवाञ्छाधिकमेव दत्त्वा, धनं ततो मानधनाभिलाषी ।
जयन्तसिंहं स ररक्ष दक्षं, स्वसन्निधावेव यशोमतीशः ॥२५॥

[ उपेन्द्रवज्रावृत्तम् ]

ग्रावा निजावासवराङ्गणोर्व्यां, विमोचितस्तेन मनस्विना सः ।
स्वबन्धुवर्गक्रमपङ्कजानां, जलेन तस्योपरि शुद्धिहेतोः ॥२६॥

[ आख्यानकीवृत्तम् ]

॥२७॥ भद्रोः सुरो भद्रपुराधिनाथो, योगीन्द्ररूपं विरचय्य नव्यम् ।
भिक्षाकृते श्रीजगडूनिवासा-ङ्गणेऽगमत्तद्गुणहृष्टचित्तः ॥२७॥
राजल्लदेवीं ददतीं सुभिक्षां, राजप्रियां तत्र स योगिराजः ।
ततो जगादेति शुभे गृहेशं, त्वं साम्प्रतं चानय मे पुरस्तात् ॥२८॥
आकारितः श्रीजगडूस्तयासौ, तत्रैत्य तद्ग्रावनिबद्धदृष्टिम् ।
ननाम योगीन्द्रमुदारबुद्धि-रत्यद्भुताकारधरं तदानीम् ॥२९॥

[ उपजातिवृत्तम् ]

त्वं निर्विलम्बं मतिमन्निदानीं, गृहाण पाषाणममुं गृहान्तः ।
किलेति योगीन्द्रवचः प्रमाणी-चकार सत्त्वैकनिधिः स धीरः ॥३०॥

[ आख्यानकीवृत्तम् ]

ग्राव्णः सन्धौ तीक्ष्णटङ्कप्रहारं, चक्रे योग्यादेशतः सत्वरं सः ।
भिन्नं चासीत्तत्पुटद्वन्द्वमुच्चै-र्दिव्या रत्नश्रेणिराविर्बभूव ॥३१॥

[ शालिनीवृत्तम् ]

रत्नान्यमून्यत्र मनोहराणि, न्यवीविशद्भूमिपतिर्दिलीपः ।
स ग्रावमध्यस्थितताम्रपत्रे, वर्णानिति प्रैक्षत सोलसूनुः ॥३२॥ ॥२७॥

[ उपजातिवृत्तम् ]

रत्नानि तानि प्रवरप्रभाणि, प्रदाय तस्मै निजदिव्यरूपम् ।
प्रदर्श्य तत्सुन्दरसौधमध्या–त्ततस्तिरोधत्त स सत्प्रभावः ॥३३॥

[ आख्यानकीवृत्तम् ]

जगत्त्रयीविश्रुतकीर्त्तिपूरः, परोपकारैकपरायणोऽसौ ।
दिने दिने भूरितरं बभार, श्रितोत्तराशोऽर्क इव स्वतेजः ॥३४॥

[ उपेन्द्रवज्रावृत्तम् ]

मन्ये श्रीजगडूमनोहरयशःकर्पूरपूरस्तथा । चक्रे सौरभसुन्दरं शुचितरं गौरीपतेर्विग्रहम् ॥
अश्रान्तं पितृकाननप्रविलसद्भस्मप्रसङ्गाय नो । रक्तार्द्रद्विपचर्मणे स्पृहयिता भूयो यथा नाप्ययम् ॥३५॥

[ शा० वि. ]

बिम्बाधरामृतरसेऽपि विलासिनीनाम् । मन्दादरो दिवि बभूव सुपर्ववर्गः ॥
[1]हाहादिगीतजगडूविलसत्सकीर्त्ति–पीयूषपानरसिकः किल सर्वदैव ॥ ३६ ॥

[ वसन्ततिलकावृत्तम् ]

इत्याचार्यश्रीधनप्रभगुरुचरणराजीवचञ्चरीकशिष्यश्रीसर्व्वाणन्दसूरिविरचिते
श्रीजगडूचरिते महाकाव्ये भद्रसुरदर्शनो नाम चतुर्थः सर्गः ॥ ४ ॥

——

१. स्वर्गगान्धर्वाः ।

## ॥ पीठदेवनरपतिदर्पदलनो नाम पञ्चमः सर्गः ॥

[उपजातिवृत्तम्]

इतश्च वैरिक्षितिपालदर्प्प-घोरान्धकारप्रशमैकभास्वान् ।
**श्रीपीठदेवः** सुतरां प्रशास्ति, ❀**पाराभिधानं विषयं** प्रशस्तम् ॥१॥

प्रत्यर्थिनो यस्य गुरुप्रताप-सन्तप्तगात्रा न सुधांशुधाम्ना ।
न पल्लवैर्नाम्बुरुहैर्जलार्द्रा-निलेन नो निर्वृतिमापुरेव ॥ २ ॥

स्वसैन्यधूलीपिहितार्कबिम्बो,भञ्जन्समग्रं किल **कच्छदेशम्** ।
अकाण्डसर्प्पत्प्रलयार्णवश्री-र्भद्रेश्वरं प्राप स पीठदेवः ॥ ३ ॥

**चौलुक्य**वंशैकविभूषणेन, **श्रीभीमदेवेन** नरेश्वरेण ।
स कारितं भद्रपुरस्य दुर्ग-मपातयत्कात[२]रितारिवर्गः ॥ ४ ॥

प्रचण्डदोर्दण्डभवं वितत्य, स्वविक्रमं तत्र समं बलेन ।
श्रीपीठदेवः प्रययौ स भूपो, भूयः समृद्धं निजपारदेशम् ॥ ५ ॥

---

❀ कच्छैशान्यां दिशि 'पारकर' इति प्रसिद्धो देशोस्ति ।

१. कच्छदेशवर्त्ति 'भद्रेश्वर' इति नामकं जैनतीर्थमधुनाप्यस्ति यत्तत् पुरम् । २. त्रासित ।

॥२६॥

भद्रेश्वरे तत्र नवीनदुर्गं, निर्मापयन्तं जगडूकमुच्चैः ।
स पीठदेवोऽपि विदाञ्चकार, कारान्तरन्यस्तसपत्नपूगः[1] ॥ ६ ॥
तत्प्रेषितः कश्चन तत्र गत्वा, सन्देशहारी किल वावदूकः ।
तद्दुर्गनिर्माणकृतोद्यमं त-मिति स्फुटां वाचमुवाच सद्यः ॥ ७ ॥
श्रीपीठदेवो नृपतिर्मदीय-मुखेन वक्तीति भवन्तमुच्चैः ।
शृङ्गद्वयं चेत्खरमूर्ध्नि भावि, तदा विधातासि च वप्रमत्र ॥ ८ ॥
तस्येति वाक्यं स निशम्य धीमा-ञ्जजल्प चानल्पमहोभिरामः[2] ।
खरस्य शृङ्गं विरचय्य मूर्ध्नि, दुर्गं करिष्ये विहितप्रयत्नः ॥ ९ ॥
वाग्मी स भूयोपि जगाद वाक्यं, द्रव्याभिमानेन गरीयसा त्वम् ।
कृत्वा मदीशेन समं विरोधं, कुलक्षयं किं कुरुषे वृथैव ॥१०॥
कः स्पर्द्धमानोऽतिमहस्विनाऽऽप, साकं क्वचिन्मङ्गलतां धरायाम् ।
पश्य प्रदीपस्य विभां विलोक्य, पतन्पतङ्गो लभते विनाशम् ॥११॥

[इत्युपजातिवृत्तम्]

येनाखिलानां रिपुपार्थिवानां, प्रचण्डदोर्दण्डभृतां क्षणेन ।

---

१. शत्रुसमूहः । २. तेजस्वी ।

हृतः प्रतापस्त्रपते प्रभुर्मे, त्वया स सार्द्धं कलिवार्त्तयोच्चैः ॥१२॥

[ आख्यानकीवृत्तम् ]

विमुञ्च तद्दुर्गविधानहेतोः, प्रयत्नतां मत्प्रभुवाक्यतस्त्वम् ।
स्वबन्धुवर्गेण विराजमानः, कुरुष्व शश्वत्कमलोपभोगम् ॥१३॥

[ उपेन्द्रवज्रावृत्तम् ]

इति ब्रुवन्तं जगडूरुवाच, दूतं जनाकूतविधिं प्रवीणः ।
दुर्गं नवीनं किल कारयिष्ये, भवत्प्रभोर्भीर्मम नास्ति कापि ॥१४॥

[ उपजातिवृत्तम् ]

ततः स दूतः पुरुहूत[1]भासा, तिरस्कृतस्तेन नितान्तमेव ।
गत्वा स्वभर्त्तुः पुरतो जगाद, दीनाननस्तत्खलु सर्ववृत्तम् ॥१५॥
निजप्रतिज्ञापरिपालनायो-पदां गृहीत्वायमथ प्रशस्ताम् ।
गत्वाणहिल्ले च पुरे ननाम, नरेश्वरं **श्रीलवणप्रसादम्** ॥१६॥

[ इत्युपजातिवृत्ताम् ]

नृपः स चौलुक्यकुलैकदीप-स्तमानमन्तं भृशमालिलिङ्ग ।
न्यवीविशत्स्वस्य समीप एव, वरासने दर्शितसत्प्रसादम् ॥१७॥

१ पुरुहूतेन इन्द्रेण तुल्या भाः कान्तिर्यस्य स तेन ।

॥३१॥

अथो मुखेन्दुद्युतिवर्द्धमान–समग्रसभ्यप्रमदाम्बुराशिः ।
नरेश्वरः प्रीणयति स्म वाचा, सुधाकिरा सोलसुतं किलेति ॥१८॥

[ उपेन्द्रवज्रावृत्तम् ]

*कच्चित्कुले ते सकले समस्ति, क्षेमं कृतिन्भद्रपुरे वरे वा ।
अस्मिन्निदेशेन विनाप्यकस्मा–त्कुतः किमर्थं भवतागमोऽत्र ॥१९॥

[ उपजातिवृत्तम् ]

मुमुक्षुचेतः सुसमाधिनेव, धरातलं मेरुमहीभृतेव ।
राज्यं त्वयैकेन मम स्थिरं वै, विराजते सद्गुणराजमान ॥२०॥
हृदि प्रमोदं नितरां दधानः, प्रशस्तधीर्भूमिभृतो निशम्य ।
इत्थं गिरं सर्वसभासमक्षं, रत्नाकरावाप्तवरो जगाद ॥२१॥
चौलुक्यवंशार्णवपूर्णचन्द्र, त्वत्खड्गधारायमुनाजलौघे ।
अप्तनरीणां निवहो विहाय, दुरापमासादयति [1]द्युभोगम् ॥२२॥

[ इत्युपजातिवृत्तम् ]

देव श्रीलवणप्रसाद भवतः स्फूर्जत्प्रतापानिले,
क्रूरारातिकुलाटवीचयपरिप्लोषेण क्लृप्तोदये ।

* कच्चिदिति कुशलप्रश्ने । १. स्वर्गवैभवम् ।

||३३||

क्षोणीमण्डलवर्त्तिनि स्फुटमिदं चित्रं महत्सर्वदा,
लोकः प्रत्युत भूरितापरहितो येनैष सञ्जायते ||२३||

[ शा. वि. ]

अर्णोराजनरेन्द्रसम्भव भवत्प्रौढप्रतापारुणं,
सर्वत्रोदयशालिनं चितितले चास्तेन संवर्जितम् ।
दर्शं दर्शमतीवकातरहृदो न द्वेषिणः कर्हिचि–
च्छन्नं छन्नपलायनैकमतयोप्यङ्घ्रीन्विमुञ्चन्ति ते ||२४||

[ शा. वि. ]

पृथिवीं त्वयि शासति प्रभो, निखिलारातिविघातकारके ।
कुशलस्य हि का कथोच्यतां, मम गोत्रेऽपि च भद्रमन्दिरे ||२५||

[ वैतालीयवृत्तम् ]

त्वया समग्रा रिपुभूमिपाला, विनिर्जिता भूरिबलान्वितेन ।
तथापि चैकस्तव पीठदेवो, मन्येत नाज्ञां कलितोरुमन्युः ||२६||

[ उपजातिवृत्तम् ]

लोकप्रमोदाय कृतोदयेन, निरन्तरस्फारतरप्रभेण । ||३३||

स घूकवद्भास्करसन्निभेन, त्वया स संस्पर्द्धत एव देव ! ॥२७॥

[ आख्यानकीवृत्तम् ]

चौलुक्यवंशाभरणेन राज्ञा, श्रीभीमदेवेन स कारितं प्राक् ।
अपातयद्भद्रपुरस्य दुर्गं, सरित्तटं वा सलिलप्रवाहः ॥२८॥

[ उपजातिवृत्तम् ]

यदि खरशिरसि स्याच्छृङ्गयुग्मं कदाचि-
द्विरचयसि तदा त्वं दुर्गमत्राभिरामम् ।
इति वचनमवादीन्मां प्रति प्रौढदर्प्पा-
वगणितपरभूपः पीठदेवस्तरस्वी ॥ २९ ॥

[ मालिनीवृत्तम् ]

अहमपि निजसन्धापालनाय प्रकामं,
क्षितिधव तव पार्श्वे शीघ्रमभ्यागतोस्मि ।
त्रिगुणितहरिदश्व[1] [2]क्षत्रियस्फारवंश-
प्रभवभटकुलं मे देहि वासाय तत्र ॥ ३० ॥

[ मालिनीवृत्तम् ]

श्रीचौलुक्यकुलाम्बरद्युतिपतेरादाय तस्मादथो,
प्रीताच्छ्रीलवणप्रसादनृपतेरुद्दामसद्विक्रमम् ।
सर्वक्षत्रियवंशसम्भवकुलश्रेणीसनाथं बलम् ,
श्रीभद्रेश्वरमाससाद नगरं सोलात्मजः सत्त्ववान् ॥३१॥

[ शा. वि. ]

भद्रेश्वरे श्रीलवणप्रसाद–भूमीशसैन्येन विराजमानम् ।
ततस्तमाकर्ण्य च पीठदेवः निजं क्वापि विमुच्य नष्टः ॥३२॥
प्रचक्रमे कारयितुं स दुर्ग–मुदग्रजाग्रत्तरबाहुवीर्यः ।
दुर्गोपरिष्टान्निशि भङ्गकर्त्तु–रस्त्रयद्भद्रसुरस्य सद्म ॥३३॥

[ उपजातिवृत्तम् ]

सर्वं सैन्यं प्राहिणोद्भूमिभर्त्रे, सोऽयं तेजोधिक्कृतारातिजातिः ।
षड्भिर्मासैस्तत्र–जाते च दुर्गे, संरक्ष्यान्यक्षत्रियाणांकुलानि ॥३४॥

[ शालिनीवृत्तम् ]

दुर्गैककोणे घटयाञ्चकार, खरं स पाषाणमयं सशृङ्गम् ।
अधः परिस्थापितपीठदेव–मातृप्रसङ्गेन विराजमानम् ॥३५॥

[ उपजातिवृत्तम् ]

॥३५॥

विभूषयामास खरस्य शृङ्गे, स भूयसा सुन्दरकाञ्चनेन ।
निजप्रतिज्ञापरिपूरणाय, कुर्व्वीत मानी हि गुरुप्रयत्नम् ॥३६॥
स पीठदेवः परिमुच्यमानं, न स्थातुमीशः क्वचिदस्य भीत्या ।
अनेन साकं रचयाञ्चकार, सन्धिं गरीयस्तरविक्रमेण ॥३७॥
गतस्तदाकारणतस्तदानीं, तत्रैष भूपो गलितोरुतेजाः ।
अवाप सन्मानविधीन्विधिज्ञा–त्तस्मादथो सोलकुलावतंसात् ॥३८॥

[ इत्युपजातिवृत्तम् ]

स्वकारितं रुद्रगिरिप्रकाशं, परिस्फुरत्सत्परिखाभिरामम् ।
अदीदृशत्तत्र नृपाय दुर्गं, स पीठदेवाय च कालवेदी ॥३९॥

[ उपेन्द्रवज्रावृत्तम् ]

सुवर्णशृङ्गद्वयशोभमानं, खरं स्वमात्रा कलितं विलोक्य ।
दुर्गैककोणे स नितान्तदुःखा–त्प्राणानमुञ्चन्मुखवान्तरक्तः ॥ ४० ॥

[ उपजातिवृत्तम् ]

पीठदेवनृपतेर्निधनत्वं, संनिशम्य किल सिन्धुमहीशः ।
भूरिभीतिकलितो जगडूकं, मानदानविधिना प्रणति स्म ॥४१॥

[ स्वागतावृत्तम् ]

[ स्रग्धरावृत्तम् ]

हेम्नः शृङ्गे सुचङ्गे खरशिरसि समारोप्य यः कारयित्वा,
दुर्गे भद्रेश्वरे श्रीलवणनरपतेस्तत्र चानीय मानी ।
षट्त्रिंशत्क्षत्रवंशप्रभवभटजनश्रेणिमोजोभिरामां,
[1]निर्माणं पीठदेवं व्यधित स जगडूरेव सत्यप्रतिज्ञः ॥४२॥

॥ इत्याचार्यश्रीधनप्रभगुरुचरणराजीवचञ्चरीकशिष्यश्रीसर्वाणन्द-सूरिविरचिते जगडूचरिते महाकाव्ये पीठदेवनरपतिदर्प्पदलनो नाम पञ्चमः सर्गः ॥५॥

—:०:—

## ॥ सकलजनसञ्जीवनो नाम षष्ठः सर्गः ॥

[ अनुष्ठुब्वृत्तम् ]

इतश्च पूर्णिमापक्षो–द्द्योतकारी महामतिः ।
श्रीमान् **परमदेवाख्यः**, सूरिर्भाति तपोनिधिः ॥ १ ॥

१. मानरहितमित्यर्थः ।

॥३७॥

श्रीशङ्खेश्वरपार्श्वस्या-देशमासाद्य यः कृती ।
आचाम्लवर्द्धमानाख्यं, निर्विघ्नं विदधे तपः ॥ २ ॥
[1]अघोषशतवर्षेषु, व्यधिकेषु च विक्रमात् ।
मार्गशीर्षस्य शुक्लायां, पञ्चम्यां श्रवणे च भे[2] ॥ ३ ॥
कटपद्राभिधे ग्रामे, देवपालस्य वेश्मनि ।
आचाम्लतपसश्चक्रे, पारणं यः शुभाशयः ॥ ४ ॥ (युग्मम्)
प्रबोधं सप्तयक्षाणां, सङ्घविघ्नविधायिनाम् ।
शङ्खेशपार्श्वभवने, यश्चकार कृपापरः ॥ ५ ॥
तस्यैवाराधनं कृत्वा, चारित्रश्रीविभूषितः ।
राज्ञो दुर्ज्जनशल्यस्य, कुष्टरोगं जहार यः ॥ ६ ॥
भूपो दुर्ज्जनशल्योऽपि, यस्यादेशमवाप्य सः ।
शङ्खेशपार्श्वदेवस्य, समुद्दध्रे च मन्दिरम् ॥ ७ ॥
बिभ्राणः पञ्चसमिती-स्तिस्रो गुप्तीरपि श्रयन् ।
सप्तदशप्रकारं च, संयमं परिपालयन् ॥ ८ ॥

१. अघोषशब्दोऽत्र त्रयोदशसंख्यावाचको ज्ञेयः. २. नक्षत्रे ।

निर्ममः सर्वभव्यानां प्रतिबोधं दिशन्भृशम् ।
सूरिः परमदेवः स, भद्रेश्वरमुपाययौ ॥ ९ ॥ (युग्मम्)

स्वपूर्वजगुरोस्तस्य, सूरेर्दुरितघातिनः ।
जगडूरकरोत्तत्र, प्रवेशमहमद्भुतम् ॥ १० ॥

तेन विश्राणिते धाम्नि, निर्दोषे सूरिपुङ्गवः ।
तस्थौ जितान्तरारातिर्–महातिशयसंश्रयः ॥ ११ ॥

गुरोरमुष्य योगेन, जगडूकस्य चेतसि ।
धर्मरङ्गो बभूवोच्चैः, सर्वार्थकरणक्षमः ॥ १२ ॥

मयूर इव जीमूतं, रथाङ्ग इव भास्करम् ।
चकोर इव शीतांशुं, गुरुं दृष्ट्वा स पिप्रिये ॥ १३ ॥

वाचस्पतिमिवादित्यो, भाग्यतो निजराशिगम् ।
गुरुमाराधयामास, जगडूः स विवेकवान् ॥ १४ ॥

भूरिकालं स्थितस्तत्र, सूरिस्तदुपरोधतः ।
प्रकाशयन् [1]सप्ततत्त्वीं, सप्तदुर्गतिघातिनीम् ॥ १५ ॥

---

१. जीवाजीवाश्रवसंवरनिर्जराबन्धमोक्षलक्षणां ।

॥३९॥

भावसारकुलोद्भूता, श्राविका मदनाभिधा ।
तत्र प्रारभताऽऽचाम्ल-वर्द्धमानतपः शुभम् ॥ १६ ॥
विना दैवतसान्निध्या-न्मुनीनामपि दुष्करम् ।
इदं तपो जगादेति, तां श्रीमज्जगड्डूगुरुः ॥ १७ ॥
श्रद्दधाना गुरोर्गां न, कुर्वाणा तत्तपः किल ।
सा साध्वी गमयामास, निर्विघ्नं कतिचिद्दिनान् ॥ १८ ॥
पिबन्तीं कांस्यपात्रेऽम्भः, तां वृत्ते कश्चनासुरः ।
[1]अधात्तीज्जागृविज्वाला-विकृत्या तत्तपो द्विषन् ॥ १९ ॥
जगड्डूमध्यमभ्रातृ-प्रिया राजल्लदेऽथ ।
विक्रम[1]सिंहधा[2]न्धाख्यौ, क्रमेण सुषुवे सुतौ ॥ २० ॥
तेजस्विनौ शुभानन्द-कारिणौ तौ महामती ।
मेरुशृङ्गमिवार्केन्दू भूषयामासतुः कुलम् ॥ २१ ॥
पुत्रीं प्रसूय राजल्ल-देवी हंसीं गुणोज्ज्वलाम् ।
[3]गोत्राणन्दकरीं रेजे, मृडानीमिव मेनका ॥ २२ ॥

---

१. जागृविरग्निरित्यर्थः । २. पक्षे गोत्राणन्दकरीं-हिमाचलानन्दकरीं मृडानीं-पार्वतीं मेनका इव ।

अथ स्वगुरुवाक्येन, सङ्घयात्रामनोरथम् ।
चकार जगदूश्चित्ते, जगतीजनतोषकृत् ॥ २३ ॥
लवणप्रसादनृपते-रनन्तरमुदारधीः ।
श्रीवीरधवलो रेजे, गुर्जरावनिपालकः ॥ २४ ॥
श्रीमान्वीसलदेवाख्य-स्तस्य पट्टे नरेश्वरः ।
प्रशास्ति पृथिवीमुच्चैः, प्रतापाक्रान्तशात्रवः ॥ २५ ॥ [ युग्मम् ]
दत्से शश्वदकामितान्यपि मुदा त्वं याचकश्रेणये ।
भूयांस्याभरणान्यहं तव पुरो याच्ञां करोम्यादरात् ॥
यच्छैकाभरणं च मे पतिमयं सद्यः कृपाम्भोनिधे !,
यं वक्ति प्रतिपक्षवर्गवनिता श्रेणीनिबद्धाञ्जलिः ॥ २६ ॥
[ शा. वि. ]

[ अनुष्टुब्वृत्तम् ]

तं चौलुक्यकुलोत्तंसं, विशाम्पतिमयं सुधीः ।
उपदीकृतरत्नौघोऽणहिल्लनगरेऽनमत् ॥ २७ ॥
तस्य प्रसादमासाद्य, प्रमोदोत्फुल्ललोचनः ।

॥४१॥

सङ्घयात्रां चिकीरेष, भद्रेश्वरपुरं ययौ ॥ २८ ॥
महेभ्या जिनतत्त्वज्ञा–स्तमन्वीयुः सहस्रशः ।
तीर्थयात्रोद्यतं शक्रं, सामानिकसुरा इव ॥ २९ ॥
सूरिः परमदेवोऽथ, शुभलग्ने विनिर्ममे ।
सङ्घाधिपत्यतिलकं, जगडूकस्य मञ्जुलम् ॥ ३० ॥
प्रयाणेऽमुष्य सङ्घस्य, नेदुस्तूर्याण्यनेकशः ।
सूचयन्तीव धर्मस्य राज्यकालं कलिं प्रति ॥ ३१ ॥
चतुर्विधोऽपि संघोऽथ, भद्रेश्वर–पुरातनात् ।
निरियाय शुचिर्धर्मो, मुनीश्वरमुखादिव ॥ ३२ ॥
राकाचतुर्दशीपच्च–सम्भूतैर्भूरिसूरिभिः ।
स सङ्घः शुशुभे गङ्गा–यमुनौघैरिवार्णवः ॥ ३३ ॥
स्वकुलस्येव सत्पुत्राः, संयमस्येव साधवः ।
अथोहुः सङ्घशकट–व्रातस्य वृषभा भरम् ॥ ३४ ॥
हेषाभिस्तु तुरङ्गाणां, वारणानां किलारवैः ।

रथानामपि चीत्कारै-र्भुजास्फोटैर्भुजाभृताम्[1] ॥ ३५ ॥
[2]नग्नानां [3]षट्पदध्वानै-र्हलू[4]लैर्वामच[5]क्षुषाम् ।
संघे चलति तस्याऽभू-च्छब्दाद्वैतमयं जगत् ॥ ३६ ॥ [ युग्मम् ]
तथापि द्युनदीतीरे, सङ्कजं पङ्कतां रजः ।
तथात्र मग्नमर्काश्वा, रथमूहुः कथञ्चन ॥ ३७ ॥
पदे पदे सुवर्णादि-दानप्रीणितयाचकः ।
वस्त्रपात्रादिना साधू-ञ्जगडूः प्रत्यलाभयत् ॥ ३८ ॥
स्थाने स्थाने ध्वजारोपं, चकार जिनवेश्मसु ।
जहार जनतादौःस्थ्यं, जगडूर्जगतीतले ॥ ३९ ॥
असङ्ख्यसङ्खलोकेन, समं यात्रां विधाय सः ।
शत्रुञ्जये रैवतके, प्राप चात्मपुरं वरम् ॥ ४० ॥
प्रासादे वीरनाथस्य, श्रीवीरसूरिकारिते ।
जात्यस्फाटिककोटीरे, भद्रेश्वरपुरश्रियः ॥ ४१ ॥

---

१. मल्लानाम् । २. वन्दिजनानां । ३. काव्यरचनाविशेषध्वनिभिः । ४. कोलाहलैः ।
५. नारीणाम् ।

स्वर्णकुम्भमतिस्फारं, स्वर्णदण्डं च सोलभूः ।
परितो जगतीं गुर्वीं, चक्रे वक्रेतराशयः ॥ ४२ ॥ [ युग्मम् ]
तत्रैषदेवकुलिका-स्तिस्रश्चारा[1]सनाश्मभिः ।
स्वपुत्रीश्रेयसे चारु-मष्टापदमचीकरत् ॥ ४३ ॥
जिनानां सप्ततिशतं, स तत्रारासनाश्मना ।
चक्रे स्वभ्रातृपुत्र्याश्च, हंस्याः श्रेयोऽर्थमुच्चकैः ॥ ४४ ॥
तथा त्रिखण्डपार्श्वस्य, महातिशयशालिनः ।
मूर्त्तौ सुवर्णपत्रं स, स्वसुताश्रेयसेऽतनोत् ॥ ४५ ॥
तडागोद्धृतये खातं कुमारमूलराजयोः ।
कारयामास जगडू-रुद्दध्रे कर्णवापिकाम् ॥ ४६ ॥
समग्रजिनबिम्बाना-मर्चनार्थमचीकरत् ।
सोलात्मजः पुरे तत्र, विशालां पुष्पवाटिकाम् ॥ ४७ ॥
पुरे कपिलकोट्टाख्ये, नेमिमाधवमन्दिरे ।
शीर्णे कालवशेनैष, समुद्दध्रे महाशयः ॥ ४८ ॥

१. आरसपाषाणेन ।

कुन्नडाख्यपुरे रम्ये, हरिशङ्करमन्दिरे ।
समुद्धार पुण्यात्मा, जगडूर्जगदर्त्तिहृत् ॥ ४९ ॥
प्रासादमादिनाथस्य, ढङ्कायां पुरि सुन्दरम् ।
नवीनं कारयामास, यशोमत्याः पतिस्ततः ॥ ५० ॥
चतुर्विंशतितीर्थेशा–लयं चारुमरीरचत् ।
प्रासादं वर्द्धमानाख्ये, नगरे स नगोत्तमम् ॥ ५१ ॥
मम्माणिकग्रावमयं, बिम्बं वीरजिनेशितुः ।
तत्र न्यवीविशच्चैष, महोत्सवपुरस्सरम् ॥ ५२ ॥
शतवाटीपुरे चैष, द्वापञ्चाशज्जिनालयम् ।
कारयामास नाभेयप्रभोः प्रासादमुत्तमम् ॥ ५३ ॥
विमलाचलशृङ्गे स, श्रीनाभेयपवित्रिते ।
सप्तैव देवकुलिका, रचयामासिवाञ्शुभाः ॥ ५४ ॥
सुलक्षणपुरासन्ने, ग्रामे देवकुलाभिधे ।
प्रासादं शान्तिनाथस्य, व्यरीरचदसौ कृती ॥ ५५ ॥
गुरोः परमदेवस्य, सूरेः पुण्यमहोदधेः ।

॥४५॥

अथ **पौषधशालां** स, **भद्रेश्वरपुरेऽकरोत्** ॥ ५६ ॥
**शंखेश्वर**जिनाधीश–रूप्यपादद्वयाश्रितम् ।
गुर्वर्थं कारयामास, [1]रिरीचैत्यं स सुन्दरम् ॥ ५७ ॥
गुरोः पौषधशालायां, विशालायां स धीरधीः ।
अथ [2]शुल्वमयं पट्टं शयनार्थमचीकरत् ॥ ५८ ॥
सूरेः **परमदेवस्य**, शिष्यं **श्रीषेणसंज्ञितम्** ।
स्थापयामास चाचार्य–पदे कृतमहोत्सवः ॥ ५९ ॥
मद्वंश्यसन्ततेरेवा–चार्यसंस्थापनामहः ।
त्वदादेशवशादुच्चैरन्वये तव जायताम् ॥ ६० ॥
धर्माधारस्य तस्येति, वचनं भक्तिपेशलम् ।
ऊरीचकार, सूरीन्द्र–स्त्रिकालज्ञानवानसौ ॥ ६१ ॥ [ युग्मम् ]
प्रादुर्बभूव यत्रास्य, पुरतः सुस्थितामरः ।
तत्र वारिनिधेस्तीरे, स देवकुलिकां व्यधात् ॥ ६२ ॥

१. पीतलमयचैत्यम् । २. ताम्रमयं ।

मसीतिं कारयामास, खीमलीसंज्ञितामसौ ।
भद्रेश्वरपुरे म्लेच्छ-लक्ष्मीकारणतः खलु ॥ ६३ ॥
शतशः कारयामास, ग्रामे ग्रामे पुरे पुरे ।
सुधास्वादुजला वापी-र्जगडूः क्षितिभूषणम् ॥ ६४ ॥
चौलुक्यनृपचक्रेण, मुद्‌गलान् स निर्गलान् ।
विजित्य जगति स्वास्थ्यं, व्यतनोदतिविक्रमः ॥ ६५ ॥
सूरिः परमदेवोऽथ, सर्वागमविशारदः ।
एकान्ते जगडूकाय, कथयामासिवानिति ॥ ६६ ॥
द्वी२न्द्व१ग्नि च१न्द्रवर्षेषु, व्यतीतेष्वथ विक्रमात् ।
दुर्भिक्षं सर्वदेशेषु, भावि वर्षत्रयावधि ॥ ६७ ॥
प्रेष्याखिलेषु देशेषु, विदग्धानात्मपूरुषान् ।
सर्वेषामपि धान्यानां, त्वं तैः कारय संग्रहम् ॥ ६८ ॥
क्षीरोदवीचिविमलं, त्वमर्जय यशोभरम् ।
समग्रजगतीलोक-सञ्जीवननिदानतः ॥ ६९ ॥
इत्थं परमदेवस्य, सूरीन्द्रस्य वचः शुचि ।

।४७॥

पीठदेवनृपाराति-स्तथेति प्रत्यपद्यत ॥ ७० ॥
अथो समग्रराष्ट्रेषु, प्रेष्य द्रव्याश्रितान्नरान् ।
सङ्ग्रहं सर्वधान्यानां, कारयामासिवानयम् ॥ ७१ ॥
सूरीन्द्रगदिते तस्मिन्, सम्प्राप्ते समये ततः ।
जलदा जगतीपीठे, वृष्टिं नैव वितेनिरे ॥ ७२ ॥
प्रचक्रमे कणन्दातु-मयं सोलतनूभवः ।
दुर्भिक्षपीड्यमानायै, जनतायै कृपानिधिः ॥ ७३ ॥
इतरेष्वपि देशेषु, जनसञ्जीवनोद्यतः ।
धान्यदानं स्वपुरुषैः, प्रावीवृतदयं ततः ॥ ७४ ॥
वर्षद्वये सदुर्भिक्षे, व्यतीतेऽथ कथञ्चन ।
कोष्ठागारकणाः सर्वे, प्रक्षीणाः पृथिवीभुजाम् ॥ ७५ ॥
दुर्भिक्षस्य तथा कापि, स्फूर्तिरासीद्यथा जनैः ।
एकस्माद्द्रम्मतः प्राप्ता-श्चणकाश्च त्रयोदश ॥ ७६ ॥
श्रीमद्वीसलदेवोऽपि, तदानीं कणवर्जितः ।
अजूहवन्नागडेन, मन्त्रिणा सोलनन्दनम् ॥ ७७ ॥

व्यवहारिजनश्रेणी-संश्रितोऽथ नरेश्वरम् ।
दिव्यरत्नोपदापाणि-स्तमानमदयं गुणी ॥ ७८ ॥
लक्ष्मीप्रदायिभिः सर्वै-र्लक्षणैर्युक्तविग्रहम् ।
तमालोक्य महीकान्तः, स्वस्य चेतसि विस्मितः ॥ ७६ ॥
अत्रान्तरे महीभर्तु-श्चित्ताकूतविधिं ततः ।
विज्ञाय चारणः कश्चि-दित्यूचेऽद्भुतधीनिधिः ॥ ८० ॥
सोलपुत्र ! भवत्तुल्यं, पुण्यं नोऽन्यस्य विद्यते ।
नृधामकुक्षौ कः पश्ये-त्कबुरान्त्रं प्रविश्य च ॥ ८१ ॥
इति तद्वचसा प्रीत-श्चौलुक्यपृथिवीपतिः ।
व्यवहारिवरं प्रोचे, जगडूकं कथश्चन ॥ ८२ ॥
सप्तात्र कणकोष्ठीकाः, शतानि तव निश्चितम् ।
श्रुत्वा मया त्वमाहूतः, साम्प्रतं कणकाङ्क्षिणा ॥ ८३ ॥
इति राज्ञो वचः श्रुत्वा, स्मित्वासौ सोलसम्भवः ।
ऊचे नाथ ! न सन्त्यत्र, मम क्वापि कणाः खलु ॥ ८४ ॥
मद्वाक्ये यदि सन्देहः, कणकोष्ठेषु तेष्वपि ।

॥४६॥

इष्टकान्तः–स्थसत्ताम्र–पत्रवर्णान्विलोकय ॥ ८५ ॥
इत्युदीर्य महीशाय, जगडूः कणकोष्ठगाः ।
इष्टका ध्रुवमानाय्य, भञ्जयामास हेलया ॥ ८६ ॥
ताम्रपत्रस्थितान्वर्णा–न्पार्थिवस्त्वित्यवाचयत् ।
जगडूः कल्पयामास रङ्कार्थं हिं कणानमून् ॥ ८७ ॥
जगौ वीसलदेवाय, जगडूरिति पर्षदि ।
तन्मे पापं म्रियन्ते चे–ज्जना दुर्भिक्षपीडिताः ॥ ८८ ॥
ददावष्टसहस्राणि, स तस्मै कणमूटकान् ।
श्रीमालान्वयकोटीर–[1]स्त्रिधा वीरत्वमाश्रितः ॥ ८९ ॥
सोमेश्वरप्रभृतय–स्तत्र सर्वे कवीश्वराः ।
जगडूकं जगत्स्तुत्यं, वर्णयामासुरुच्चकैः ॥ ९० ॥
श्रीश्रीमालकुलोदयक्षितिधरालङ्कारतिग्मद्युतिः ।
प्रस्फूर्जत्कलिकालकालि[2]यमदप्रध्वंसदामोदरः ॥
रोदःकन्दरवर्तिकीर्तिनिकरः सद्धर्मवल्लीदृढ– ।

१. दानदयायुद्धेषु वीरत्वं प्राप्त इत्यर्थः २. कालियनामा सर्पविशेषः ।

[1]त्वक्सारो जगडूश्चिरं विजयतां सर्वप्रजापोषणः ॥ ६१ ॥

पाताले क्षिपता बलिं मुरजिता किं साधु चक्रेऽमुना ।
रुद्रेणापि रतेः पतिश्च दहता का कीर्तिरत्रार्जिता ।
दुर्भिक्षं क्षितिमण्डलक्षयकरं भिन्दन्भृशं लीलया ॥
स्तुत्यः साम्प्रतमेक एव जगडूरुद्दामदानोद्यतः ॥ ६२ ॥

[ शार्दूलवि० ]

परं ब्रह्म ब्रह्मा स्मरति परिमुक्तान्यविषयः ।
प्रकामं श्रीकण्ठः क्षितिधरसुताश्लेषरसिकः ॥
श्रियः कृत्वोत्सङ्गे स्वपिति चरणौ विष्णुरुदधौ ।
समुद्धर्तुं लोकं जगति खलु जागर्ति जगडूः ॥ ६३ ॥

[ शिखरिणी ]

[2]एकभूभृत्समुद्धर्त्ता, श्रूयते हि चतुर्भुजः ।
[3]सर्वभृत्समुद्धारी, जगडूर्द्विभुजोऽप्यहो ॥ ६४ ॥

१. त्वचि सारो यस्य स वंशतुल्य इत्यर्थः । २. विष्णुपक्षे भूभृच्छब्देन गोवर्द्धननामा पर्वतो ग्राह्यः ।
३. जगडूपक्षे राजशब्दो ग्राह्यः ।

।५१॥

शक्रादिकसुरा गौर्णी, दधते लोकपालताम् ।
वस्तुतः सोलतनये, लोकं पालयति स्फुटम् ॥ ९५ ॥
[ अनुष्टुब् ]

तात्रैकपन्नगकुलेन [1]पतत्त्रिनाथा–ज्जीमूतकेतुतनयेन किमस्य साम्यम् ।
दुर्भिक्षदैत्यवदनादखिलां धरित्रीम्, संरक्षतः सुकृतिनः किल सोलजस्य ॥ ९६ ॥
[ वसन्ततिलका ]

[ स्रग्धरावृत्तम् ]

किं विष्णुः किं विरञ्चिः किमुतः पशुपतिः पावकः किं मरुत्किम्।
किं शक्रः किं कुबेरः फणिपतिरपि किं नैऋर्तः किं यमः किम् ॥
किं कूर्मः किं प्रचेता[2] वहति भुवमिमामन्तकालेऽतिघोरे ।
नैवं नैवं न चैवं प्रियसखि! विजये सोलजस्तां पिपर्ति ॥ ९७ ॥

सा कामगव्यपि निशम्य तवोरुदान–कीर्तिं सुमेरुशिखरे द्युवधूप्रगीताम् ।
अत्यन्तमत्सरवती ददते न दुह्य–माना स्ववाञ्छितफलानि सुरव्रजस्य ॥९८॥
नष्टेषु दिक्करिषु पोत्रिणि मुक्तवीर्य्ये, शेषे नितान्तनतशीर्षपरंपरेऽपि ।



१. गरुडात् । २. वरुणः । ३. वराहे, तन्नाम्नि विष्णोस्तृतीयावतार इत्यर्थः ।

पङ्क्तान्तरे क्वचन खेलति [1]कूर्मराजे, भूमिं बिभर्ति जगडूः पुनरेक एव ॥९९॥

[ वसन्ततिलकावृत्तम् ]

भजते जगतीतले तुलां, जगडूकस्य न तस्य कश्चन ।
सकलं जनमुद्दधार यः, किल दुर्भिक्षयमाननान्तरात् ॥१००॥

[ वैतालीयवृत्तम् ]

जगडूरूपेण हरि–दुर्भिक्षमहार्णवाभिभूताम् ।
द्राग्बिभराम्भूव भूमिं, भूयः सम्भूतकारुण्यः ॥१०१॥

[ आर्यावृत्तम् ]

[ शार्दूलविक्रीडितवृत्तम् ]

श्रीश्रीमालकुलैकभूषण ! धृते भूमीभरेऽस्मिंस्त्वया ।
धत्तां पन्नगनायको निजवधूराजीपरीरम्भताम् ॥
स्वर्गङ्गासलिलान्तरष्टककुभाऽन्तेऽपि द्विपाः सन्ततम् ।
कुर्व्वन्तु प्रमुदान्विता स्वकरिणीवर्गेण केलिं समम् ॥१०२॥
जगत्त्रयेऽस्मिञ्जगडूयशःश्रिया, व्यचिन्तयन्निर्मलिते हरिर्हृदः ।

---

१. तन्नाम्नि विष्णोर्द्वितीयावतार इत्यर्थः ।

मम द्विपं वाजिनमप्यमुश्च कः, सुरारिरत्राहरदुग्रविक्रमः ॥१०३॥

[ वंशस्थवृत्तम् ]

[ शार्दूलविक्रीडितवृत्तम् ]

गर्वप्रोद्धुरपीठदेववनितानेत्राञ्जनश्रीहरो,
हम्मीरप्रतिवीरविक्रमकथासर्वस्वलापोल्बणः ।
माद्यन्मुद्गलधामचण्डमहिमप्रध्वंसनोष्णद्युतिः,
श्रीमद्गुर्जरराज्यवर्द्धनकरः सोलात्मजःस्ताज्जयी ॥१०४॥

कल्पद्रुचिन्तामणिकामधेनु–समन्वितैरप्यमरैरहारि ।
दौस्थ्यं हि यन्नाखिलभूतलस्य, तल्लीलया श्रीजगडूर्भिनत्ति ॥१०५

अज्ञानवद्भ्यः सुरधेनुरत्न–महीरुहेभ्यो जगदुद्दिधीर्षुः ।
आदाय दानं निदधे विधाता, वामेतरे श्रीजगडूकराब्जे ॥१०६॥

[ उपजातिवृत्तम् ]

अम्भोरुहेषु सकलेषु सुरस्रवन्त्या, यस्यप्रतापतपनेन विकस्वरेषु ।
नित्यं विदन्ति न हि सप्तमहर्षयोऽपि, सायन्तनं समयमुत्तमभावभाजः ॥१०७॥

[ वसन्ततिलकावृत्तम् ]

॥५५॥

न श्लाघ्यः स युधिष्ठिरोयमवदद्योऽलीकमेवाहवे ।
द्रोणाचार्यवधाय निर्मितमतिः सत्यप्रतिज्ञोऽपि च ॥
धन्यः सोऽपि न नैषधिर्निजवधूर्येनोज्झिता कानने ।
तत्सत्ये जगदुद्धृतावपि चिरं वर्ण्योऽस्तु सोलात्मभूः ॥१०८॥
[ शा० वि० ]

विक्रमादित्यभूपेन, पुरा भूतलमुद्धृतम् ।
अधुना जगडूकेनो-द्ध्रियते च गतांहसहसा ॥१०९॥
[ अनुष्टुब्वृत्तम् ]

काम्यां कामपि वेत्सि नो यदि कलां सेवां यदि क्ष्मापते-
र्नो वेत्सि व्यवसायतां न यदि वा नो वेत्सि कृष्यादिकम् ।
भर्तस्तर्हि कथं जडाशय! पुनर्नो वेत्सि विश्वम्भरा-
भारोद्धारधुरीणमद्भुतमतिं तं चापि सोलात्मजम् ॥११०॥
[ शा. वि. ]

निखिलमपि भुवनमेत-द्दष्टं दुःसमयदन्दशूकेन ।
प्रचुरान्नदानसुधया, जगडूरुज्जीवयामास ॥ १११ ॥ ॥५५॥
[ आर्यावृत्तम् ]

 

मान्धाता[1] न पुरूरवा[2] न न शिबिर्गाधिर्न नो हैहयो[3] ।
दौष्यन्तिर्न[4] भगीरथो न न मनुर्नापि त्रिशङ्कोः सुतः[5] ॥
नो कर्णो जनमेजयो न न वसुर्यत्राप भूमीतले ।
तद्भेजे जगडूः पितामहपदं भूमीभुजां पालनात् ॥११२॥
[ शा० वि० ]

युगत्रयाधिकाचारो, जगडूरभवत्कलौ ।
दुर्भिक्षेऽखिलभूपाला येन लोकैः सहोद्धृताः ॥११३॥
पातकं पूर्वगङ्गाया, एकं गच्छति धीमताम् ।
त्वत्तः पश्चिमगङ्गाभा-दारिद्र्यमपि नश्यति ॥११४॥
[ अनुष्टुव्वृत्तम् ]

[ शार्दूलविक्रीडितवृत्तम् ]

वृष्टिं वारिधरस्य भानुशशिनोरालोकमब्धेस्तथा ।
सेवां रोहणभूभृतोद्रुमफलानीहेत भूयो जनः ॥

१. तन्नामा सूर्यवंशीयराजा. २. तन्नामा चंद्रवंशीयराजा । ३. कार्त्तवीर्यराजः । ४. भरतराजः ।
५. हरिश्चन्द्रराजः ।

दारिद्र्यव्रजदारणं तव धनं सम्प्राप्य भूमीतले ।
श्रीमत्सोलकुलैकमण्डन ! पुनः कुर्वीत कोऽर्थी स्पृहाम् ॥११५॥

स्थेमक्षेमवती सुवैभववती भूरिप्रतिष्ठावती ।
सत्सौभाग्यवती भृशं नयवती सद्धर्मलीलावती ॥
कीर्तिस्तोमवती महोदयवती नित्यं तथा धीमती ।
कामं कान्तिमती सती विजयतां सोलस्य शाखा चिरम् ॥११६॥

लीलादारितपीठदेवनिबिडाहंकार ! ते सद्यशः-
प्रासादे कलितोन्नतौ चिरतरं लक्ष्म्याः सनाथेऽनघे ।
भानुः काञ्चनकुम्भति द्युशिखरी प्रोद्दामरैदण्डति ।
स्वःसिन्धोरपि निर्मलध्वजपटत्यम्बुप्रवाहः स्फुरन् ॥११७॥

धन्वन्तरिर्भूवलयेऽवतीर्णो, भूयोऽपि सोलात्मभुवच्छलेन ।
धान्यौषधिं सङ्ग्राहवान्निहन्तुं, दुर्भिक्षरोगं जनतार्तिहेतुम् ॥११८॥

[ इन्द्रवज्रावृत्तम् ]

हे ब्रह्मंस्तव साधु बुद्धिललितं मन्यामहे सर्वदा ।
श्रीश्रीमालकुले कलङ्कविकले येन त्वया निर्ममे ॥

॥५७॥

सोऽयं श्रीजगडूरुदारचरितो नो चेद्धरित्रीतलं ।
दुर्भिक्षव्यसनेन पीडितमिदं कस्मात् स्थिरत्वं श्रयेत् ॥११६॥

[ शा० वि० ]

कल्पद्रु चिन्तामणिकामधेनवः । श्रीसोलसूनुत्रितयच्छलद्भुवि ॥
मन्येऽवतेरुस्त्रिदिवाद् द्युसद्मनां । स्वास्थ्यं कथं भावि हि तद्वियोगिनाम् ॥१२०॥

[ इन्द्रवंशावृत्तम् ]

दाने माने विवेके सुवचसि सुनये साहसे धाम्नि धैर्ये ।
दाक्षिण्ये च त्रपायां गुरुजनविनतौ भावनायां दयायाम् ।
औचित्ये वा धृतौ वा धरणिधवकुलस्थापनायां धराया-
मेकः श्रीसोलजन्मा रचयति जगडूर्मानसं सर्वदापि ॥१२१॥

[ स्रग्धरावृत्तम् ]

[ अनुष्टुब्वृत्तम् ]

इति तैः कविभिर्वर्ण्य-मानं श्रुत्वा निजं यशः ।
नम्रीचकार वदनं, जगडूस्तत्र लज्जया ॥१२२॥
भूरिवैभवदानेन, प्रीणयित्वा स तान् कवीन् ।
चौलुक्यभूपमापृच्छ्य, भद्रेश्वरमुपाययौ ॥१२३॥

स द्वादशसहस्राणि, प्रददौ कणमूटकान् ।
हम्मीरनामधेयाय, सिन्धुदेशमहीभुजे ॥१२४॥
अष्टादश सहस्राणि, स ददौ कणमूटकान् ।
भूपायावन्तिनाथाय, तदा मदनवर्मणे ॥१२५॥
स ददौ गर्जनेशाय, मोजदीनाय सत्वरम् ।
सद्धान्यमूटकानां च, सहस्राण्येकविंशतिम् ॥१२६॥
राज्ञे प्रतापसिंहाय, काशीनाथाय सोलभूः ।
द्वात्रिंशतं सहस्राणि, प्रददौ कणमूटकान् ॥१२७॥
स्कन्धिलाय महीभर्त्रे, चक्रिख्यातिभृते तदा ।
स द्वादशसहस्राणि, प्रददौ कणमूटकान् ॥१२८॥
द्वादशाभ्यधिकं दान-शालाशतमुदारधीः ।
जगडूः सुकृताधारो, जगज्जीवातुरातनोत् ॥१२९॥
स्वर्णदीनारसंयुक्तां-[२]ल्लज्जापिण्डान् स कोटिशः ।

---

१. इन्द्रप्रस्थपतये ।
२. तत्र दुःसमये यः कुलीनां याचितुं लज्जते तस्मै जगडूर्गुप्तद्रव्यं ददातीत्यर्थः सूचितः ।

॥५६॥

निशायामर्पयामास, कुलीनाय जनाय च ॥१३०॥

[ इत्यनुष्टुब्वृत्तम् ]

नवनवतिसहस्रयुता, नवलक्षा धान्यमूटकानां सः ।
अष्टादशरैकोटी–रर्थिभ्योदत्त दुःसमये ॥१३१॥
निःसीमदानदाता, हरिकान्ताहृदयहारशृङ्गारः ।
दुर्भिक्षसन्निपाते, जगडूस्त्रिकटूपमां[1] भेजे ॥१३२॥

[ आर्य्यावृत्तम् ]

पराभवो नलस्यापि, कलिना येन निर्ममे ।
सोऽप्युच्चैर्जगडूकेन, त्याजितो जगतीतलम् ॥१३३॥
स साधर्मिकवात्सल्य–कर्म–निर्मलमानसः ।
इतरेष्वपि देशेषु, पुरुषैः स्वैरचीकरत् ॥१३४॥

[ अनुष्टुब्वृत्तम् ]

नक्तं नक्तं निहितकनकोदारदीनाररम्यान् ।
प्रच्छन्नं यः सुचरितनिधिर्मोदकान् कोटिशोऽदात् ।

१. त्रयाणां शुण्ठिपिप्पलीमरीचानां समाहारस्त्रिकटु तदुपमां ।

लज्जावेशादनुदितगिरे जात्यलोकाय कामं ।
भूतो भावी भवति कृतिना तेन तुल्यः क्षितौ कः ॥१३५॥
[मन्दाक्रान्तावृत्तम्]

इति वत्सरत्रितयदुःसमयं, विदलय्य तीव्रतरमप्यवनौ ।
जगडूः समग्रजनजीवनकृ--त्समभूतत्प्रभूतरभूतियुतः ॥ १३६ ॥
[ प्रमिताक्षरावृत्तम् ]

॥ इत्याचार्य्यश्रीधनप्रभगुरुचरणराजीवचञ्चरीकशिष्यश्रीसर्वाणन्दसूरिविरचिते जगडूचरिते महाकाव्ये सकलजनसञ्जीवनो नाम षष्ठः सर्गः ॥ ६ ॥

---

## ॥ त्रिविष्टपप्रापणो नाम सप्तमः सर्गः ॥

विरचय्य वृष्टिमथ वारिधरा, जगतीतलेऽपि सकले रुचिराम् ।
शमयाम्बभूवुरुरुदुःसमय--प्रभवं भयं तनुमतां सपदि ॥ १ ॥
[ प्रमिताक्षरावृत्तम् ]

अम्भोधरा नर्तितनीलकण्ठाः, स्वगर्ज्जनच्छद्ममृदङ्गनादाः ।
सचातकव्रातरवच्छलेन, जगुस्तरां श्रीजगडूयशांसि ॥ २ ॥

॥६१॥

धाराधरा गर्जनकैतवेन सोलात्मजं प्राहुरिति प्रमोदात् ।
त्वमेव सञ्जीवनदानशीलो वर्षत्रयं प्रीणयति स्म पृथ्वीम् ॥ ३ ॥

[ उपजातिवृत्तम् ]

अतिधान्यवृद्धिकलिता पृथिवी, समजायताम्बुधरवर्षणतः ।
मुमुदे जनस्तदनु चारुतरं, जगडूयशः प्रतिदिनं प्रवदन् ॥ ४ ॥

[ प्रमिताक्षरावृत्तम् ]

परमदेवगुरुं त्रिदिवाङ्गना-जनविलोचनसम्मदकारकम् ।
समवगत्य ततो जगडूः कृती, स्वहृदि शोकभरं नितरां दधौ ॥५॥

[ द्रुतविलम्बितवृत्तम् ]

विमलाचले स किल रैवतके-ऽखिलसङ्घलोककलितः सुकृती ।
अगमत्पवित्रितधनप्रकरः, शुचिपात्रदानकलया सततम् ॥ ६ ॥

[ प्रमिताक्षरावृत्तम् ]

अथ भद्रमन्दिरमुपेत्य कृती, जगडूर्जगत्त्रयविसारियशाः ।
निजसङ्घलोकगुरुभक्तिविधे-रपुनीत नीतिललितः स्वकुलम् ॥ ७ ॥

[ प्रमिताक्षरावृत्तम् ]

( रथोद्धतावृत्तम् )

॥६३॥ वीसलक्षितिपतेर्नियोगतो, नागडः शुचिरियाय मन्त्रिराट् ।
तत्र सोलतनयेन निर्मल-स्नेहवैभववताथ सत्कृतः ॥ ८ ॥
भूभुजोऽस्य जलधेस्तटे तरीः, सत्तुरङ्गमवती समन्ततः ।
उन्ममज्ज मरुतातिवेगतो, भङ्गमाप च तपात्ययागमे ॥ ९ ॥
विंशतिस्तु तुरगा मृता जला-देक एव तुरगः स जीवितः ।
तीरमाप किल तद्ग्रहोद्यमं, निर्ममे झटिति नागडः सुधीः ॥१०॥
भूपमन्त्रिवरमाह सोलभू-र्मुच्यतां मम हयेऽभिलाषिता ।
अन्यवस्तुनि विधीयते मनो, नो कदापि कृतिना त्रपिष्णुना ॥११॥
नागडोऽपि गदति स्म हे कृति-न्मत्प्रभोस्तुरग एष निश्चितम् ।
अन्यथेदमपि चेत्तदा ददे, विंशतिं हयवरांस्तवाप्यहम् ॥१२।
एवमस्त्विति निगद्य सोलभू-र्वाजिनस्तदनुकण्ठदेशतः ।
चर्मणा कलितमाददे स्वयं, पत्रमाशु निजनामभूषितम् ॥१३॥
न्यक्कृताननमथो तदीक्षणा-दाह नागडमिति प्रसन्नहृत् । ॥६३।
अब्धिरेष मम कामपि, श्रियं नैव रक्षति वरप्रदः क्वचित् ॥१४॥

नार्थये खलु पणीकृतान्हया–न्विंशतिं द्विजवर! त्वदग्रतः ।
आवयोर्गुरुतरा विजृम्भतां, प्रीतिरेव शुचिसौख्यकारिणी ॥१५॥
वीसलक्षितिपधीसखोत्तमः, सोलपुत्रवचनेन चारुणा ।
प्रीतिमाप नितरां निजाशये, को न हृष्यति विवेकिनां गुणैः ॥१६॥

[ इति रथोद्धतावृत्तम् ]

श्रीषेणसूरिचरणाम्बुजराजहंसः,
सद्दानकीर्तिभरनिर्जितकल्पवृक्षः ।
चक्रे स्वचेतसि जिनाधिपतिप्रणीत–
तत्त्वैकचिन्तनधियं सुकृती सदैव ॥१७॥

[ वसन्ततिलकावृत्तम् ]

भद्रेश्वरे भद्रजनाग्रतोऽथ, श्रीषेणसूरौ वदति प्रभाते ।
सम्यक् स्वरूपं च [1]सरीसृपाणां, समागतः कश्चन दुष्टयोगी ॥१८॥

[ उपजातिवृत्तम् ]

स मत्सरी नागमतोरुवादं, समं मुनीन्द्रेण चकार तेन ।

---

१ सर्प्पाणाम्–

समग्रसभ्येषु विचक्षणेषु, तदा निषण्णेषु, चमत्कृतेषु ॥१९॥

( उपेन्द्रवज्रावृत्तम् )

[ उपजातिवृत्तम् ]

विषोल्बणेन प्रहितेन तेन, केनापि नागेन च दश्यते स्म ।
कराङ्गुलीपेशलपल्लवाग्रं, श्रीषेणसूरेरमलाशयस्य ॥ २० ॥
तस्मिन् गते सूरिवरस्तदानीं, जगाद भव्यानिति तीव्रदुःखान् ।
अहं विशाम्यत्र हि गर्भगेहे, ध्यानं प्रकर्तुं विषनाशहेतोः ॥२१॥
सम्मोहिनीं साधयितुं स्वविद्यां, कपालमीहेत ममैष योगी ।
आकृष्टखड्गैरिह तद्भवद्भि-र्द्वारं नियन्त्र्य स्फुटमेव भाव्यम् ॥२२॥
हुङ्कारनादश्रवणान्ममाशु, द्वारं समुद्घाट्य च गर्भधाम्नः ।
विलोकयध्वं सुकृतैककामा, यूयं च मामम्बुरुहासनस्थम् ॥२३॥
प्रपेदिरे तेऽस्य वचस्तथेति, स गर्भगेहान्तरुपेत्य सद्यः ।
नियोजयामास मनः स्वकीयं, शुद्धे परब्रह्मणि मुक्तदोषः ॥२४॥
सद्ध्यानयोगेन निवार्य सूरिर्विषस्य तस्य प्रसरं निजाङ्गे ।
हुङ्कारनादं रचयाञ्चकार, प्रापुः प्रमोदं च समग्रभव्याः ॥२५॥

॥६५॥

कराङ्गुलीपल्लवदेशभाजो, विषस्य बिन्दूनथ सूरिराजः ।
छेदं नखघ्न्या स्वयमेव कृत्वा, प्रपातयामास पतद्ग्रहान्तः ॥२६॥
विषार्तिमुक्तं स गुरुं प्रणम्य, सूरीश्वरं भक्तिभरेण योगी ।
गीतं जगौ चारुतरं तदीय-मध्यात्मरूपार्थयुतं तदैव ॥२७॥
स योगिनं सूरिरसौ जगाद, कारुण्यपाथोनिधिरित्थमेव ।
इतो दिनात्सप्तमके दिने ते, पश्यामि मृत्युं भुजगादमुष्मात् ॥२८॥
[1]कन्थापुरे सोऽथ जगाम योगी, तत्रान्ययोगीन्द्रकृतोरुवादः ।
अवाप तस्मादुरगाच्च मृत्युं, निवेदिते सूरिवरेण यस्रे ॥२९॥
श्रीषेणसूरेरिति सत्प्रभाव--विभूतिमालोक्य स सोलजन्मा ।
भृशं चमत्कारभरं दधार, हर्षप्रकर्षं च निजाशयान्तः ॥३०॥
श्रीसङ्घयात्राप्रमुखानि धर्म--कार्याण्यनेकानि तदीयवाक्यात् ।
स साधयामास चिरं धरित्री--शृङ्गारहारः कलिनाशकारी ॥३१॥
अथ प्रपूर्यायुरयं स्वकीयं, श्रीषेणसूरेः श्रुतधर्मतत्त्वः ।



१. कन्यकोटाख्यपुरे-- ।

॥६७॥

जगज्जनोद्धारकरः किल द्यां, ययौ हरेर्लोचनपावनाय ॥३२॥ [ इत्युपजातिवृत्तम् ]

[1]वैरोचनोऽद्य सुकृती [2]शिबिरद्य चाद्य, जीमूतकेतुतनयोऽद्य[3] च विक्रमार्कः ।
अद्यैव भोजनृपतिश्च जगाम नाक--मस्मिन्गते निधनतामिति लोक ऊचे ॥३३॥
[ वसन्ततिलकावृत्तम् ]

प्रशमिताहितकौशिकसम्मदे, वसुनिरस्तसमस्ततमोभरे ।
क्षितिरियं [4]जगङ्कसवितर्यहो, अजनि कालहृतेऽपमदा क्षणात् ॥३४॥
[ द्रुतविलम्बितवृत्तम् ]

उत्तारयामास स गर्जनेशो, मौलिं शिरस्तः क्षितिपोऽर्जुनोऽपि ।
रुरोद बाढं विदधेऽशनं न, दिनद्वयं सोऽपि च सिन्धुभूपः ॥३५॥
श्रुत्वास्य सम्यक् परलोकवार्तां, तदेति तच्चारुगुणौघहृष्टः ।
कः कः क्षितीशो न चकार शोकं, क्षोणीतलेऽस्मिन्निखिलेऽपि नूनम् ॥३६॥ [उप.वृत्तम्]

मन्ये [5]मोहमहीपतिः स्वमनसि प्राप प्रमोदोदयं ।
जातः प्रौढतरप्रतापविभवः प्रोल्लासकारी [6]कलिः ॥

---

१. बलिराजः । २. तन्नामा राजा । ३. जीमूतवाहनः । ४. जगडूरेव सविता सूर्यस्तस्मिन् । ५. कामदेवः । ६. चतुर्थयुगं ।

॥६७॥

आतङ्कं बिभराम्बभूव सुतरां धर्मस्तु सोलात्मजे ।
स्वर्गस्त्रीजनचित्तसंमदकृति प्रोच्चैरभाग्याद्भुवः ॥ ३७ ॥ [ शा० वि० ]

तद्बान्धवौ राजकपद्मसंज्ञौ, गुरोर्गिरा शोकभरं विमुच्य ।
भूयोऽपि सद्धर्मविधौ धुरीणौ, बभूवतुर्भूपतिमाननीयौ ॥३८॥ [ उपजातिवृत्तम् ]

प्रेङ्खच्छारदपार्वणेन्दुकिरणस्तोमावदातस्फुर--त्कीर्तिश्रीभरनिर्मलीकृतभुवौ श्रीसङ्घमुख्याविमौ ।
श्रीषेणाह्वयसूरिराजचरणद्वन्द्वैकसेवापरौ, श्रीमद्वीसलसत्कुलं चिरतरं संशोभयामासतुः ॥३९॥
[ शा० वि० ]

तेजः सर्वसपत्नदर्प्पदलनं विश्वम्भरोद्धारकृ--द्दानं साहसमप्यनेकसुमनश्चेतोलसद्विस्मयम् ।
बुद्धिः श्रीजिनधर्ममर्मविषया चन्द्रप्रभाभासुरा,कीर्त्तिः श्रीनिलयस्य तस्य जगडूनाम्नः प्रियं किं न किम् ।४०
[ शार्दूलविक्रीडितवृत्तम् ]

इत्याचार्य्यश्रीधनप्रभगुरुचरणराजीवचञ्चरीकशिष्यश्रीसर्व्वाणन्दसूरिविरचिते श्रीजगडूचरिते महाकाव्ये त्रिविष्टपप्रापणो नाम सप्तमः सर्गः ।

समाप्ते च सप्तसर्गे समाप्तोऽयं ग्रंथः